17-18. In course of time the words Sat and Asat were taken to mean different things and as a result seven schools came into existence. Each of them had three inner divisions (Sadvāda, Asadvāda and Sadasadvāda) and therefore they became twenty one schools. Ojha names them as 1. Pratyayādvaita Kalpa. 2. Prakṛtyadvaitakalpa. The third one and fourth one are named 3. Tādātmyavikalpa and 4. Abhikāryavikalpa. The fifth one is Ātmagunakalpa. Sāmanjasyavikalpa and Aksaravikalpa are the sixth and seventh schools. The last four and the first three hold mutually opposite views. Ojha deals with them briefly in his Dasavādarahasya.

1. Pratyayādvaitavāda

19-20. This deals with Sat-Asat concept in relation to three entities namely Pratyaya (Jñana acquired through the Indriyas) drasta (seer) and dṛśya (the thing seen). When we see a thing, there is a seer (draṣtā) and also there is a thing which is seen (dṛśya). Of these the seer is Sat and the thing seen is Asat. While the seer always remains one ('I' - I see it) and it is for this reason he is called Sat, the seen (dṛśya) is not always the same and therefore does not remain single. It is for this reason it is called Asat. When both these are involved, the knowledge we acquire is called Pratyaya. Of the two it is the draṣtā (seer) that it more important. It is draṣtā's (I's) inner world which is said to be his jyotis or the luminous mental screen (Ātmajyoti) that receives the pictures of the outside world and knowledge of the same (Pratyaya) is acquried by the Draṣṭā. It is for this reason our sages thought that Draṣṭā and Dṛśya are the same. This was one view which falls under Sadvāda.

21-22. Some others of this school thought that it is Dṛśya that is important. Draṣṭā is an imaginary thing and cannot be seen. If he can be seen he becomes Dṛśya. This view was that of Asadvādins of this school. Yet a third view was that both Draṣṭā and Dṛśya are there and both are equally important in the

दृश्यं हि मुख्यं न च दृश्यभिन्नो द्रष्टा स वै दृश्यविशेष एकः ।
न्यूनाधिको मूर्छित एष दृष्टः स दृश्यधर्माऽस्ति विभुः कथं स्यात् ॥ २१ ॥
दृष्टा च दृश्यश्च पृथक्पदार्थौ ताभ्यां पुनः प्रत्यय एष युक्तः ।
संप्रत्ययेऽस्मिन् प्रभवंति पक्षास्त्रयो विकल्पं प्रथमं तमाहुः ॥ २२ ॥
इति प्रत्ययाद्वैतकल्पः ।

६-कर्मासदुक्तं तदिदं पुरासीदद्यापि पश्याम्यसदेव सर्वम् ।
न सत्प्रपश्यामि कदापि किञ्चिद्यदत्र सत्पश्यसि स भ्रमोऽस्ति ॥ २३ ॥
ब्रह्मैव सन्नाम तदग्र आसीत् तदेव सर्वं न तदन्यदस्ति ।
कर्माऽसदेतन्न कदाचिदासीन्न चास्ति न क्वापि भविष्यतीदम् ॥ २४ ॥
कर्म त्वसद् ब्रह्म सदित्थमेतद्द्वयं प्रपश्यामि समस्तमेतत् ।
एकेन चाऽन्यन्न विना कृतं स्यादित्थं विकल्पोऽभिमतो द्वितीयः ॥ २५ ॥
इति प्रकृत्यद्वैतकल्पः ।

७-असद्धि कर्मैव तदग्र आसीद् यद्ब्रह्म सन्नाम न तत्पुरासीत् ।
ब्रह्मासतः सत्पुनरत्र जज्ञे न कर्म्मणो ब्रह्म पृथक् पदार्थः ॥ २६ ॥
ब्रह्मैव सन्नाम तदग्र आसीत् कर्म त्वसन्नाम न तत् पुरासीत् ।
कर्म्मासदस्मात्सत एव जज्ञे न ब्रह्मणः कर्म पृथक् पदार्थः ॥ २७ ॥
यद् ब्रह्म सद् यत्वसदत्र कर्मद्वयं सहासीन्न पुरैकमासीत् ।

process of acquiring knowledge (Pratyaya). This is Sadasadvāda.

2. Prakṛtyadvaitavāda

23-25. According to this school karma is Asat. Karma is that which was not there earlier but is there now for some time and later again it will not be there. It is for this reason it is called Asat. In this Jagat we see only activity (Karma) which is constantly changing and it looks as though nothing is permanent or everlasting. This leads us to conclude that the whole Viśva is nothing but Karma and therefore is Asat. Take it that Asat means that which sometimes exists and sometimes does not exist. This is Asadvāda. On the other hand, when we consider Jagat as manifestation of Jñāna (Brahman) then it was there in the beginning, it is there now and it is going to be there in the future also because it is nothing but Jñāna and is quite different from pure Kriyā. Since it is always there it is Sat. This is Sadvāda of this school.

The third view is that Karma is Asat and Brahman being pure Jñāna is Sat and we always see both in this Jagat and they are inseparable (ब्रह्मकर्मणोः अर्थात् सदसतोः सहावस्थानमेव जगत्). Things are constantly changing but behind these changes there is an unchanging background. For example, Devadatta was a child. Some years later he became a boy, then a youth, then a man and now he is an old person. But we also know that he is the same Devadatta who had undergone all these changes. Thus Jagat is made up of Sat and Asat. This is Sadasadvāda.

3. Tādatmyavāda

26-28. Tādātmyavāda is based on the belief that Jñāna and Karma are two sides of the same coin. They are not different from each other. Jñāna is Sat and Karma is Asat. In these two it is Karma that is important because Jñāna depends on its existence. Therefore to say that Karma appeared first and then Sat came into existence amounts to Asadvāda. On the other hand, the Sadvādin says that it is Jñāna that is Sat

तुच्छेन तेनावृतमेव चाभु ब्रह्मैतदासीदिति वा विकल्पः ॥ २८ ॥
इति तादात्म्यविकल्पः ।

८-सदेव तु ब्रह्म न चाऽसदेतत् कर्म त्वसत् प्रागथ सच्च पश्चात् ।
असच्च सच्चेति यतो द्विधा तत् ततः पुनस्तत्र पृथक् विचारः ॥ २९ ॥
कर्म्मेदमग्रे त्वसदेव चासीत् पुनः सदेतत् स्वयमेव जज्ञे ।
यद्वा पुरापीदमसद्यदासीत् तद्वै सदासीन्न तु सर्वथाऽसत् ॥ ३० ॥
अथापि वा ब्रह्म यथा सदुक्तं तत् कर्म तद्वत् सदसन्निरुक्तम् ।
तदस्ति नास्तीति हि कर्मरूपं स्वाभाविकं स्यादिति वा विकल्पः ॥ ३१ ॥
इत्यभिकारिविकल्पः ।

९-असत्पुरासीत् सदसत्पुरासीत् तत्सत्पुरासीन्न च तद्धिदासीत् ।
भवन्ति वाक्प्राणमनःसु पौर्वापर्य्यस्य वादा इति याज्ञवल्क्यः ॥ ३२ ॥
प्राणात् तु सृष्टावसदग्र आसीत् सृष्टौ मनस्तः सदसत् पुरासीत् ।

---

and it appeared first and Karma which is nothing but another form of Jñāna, that is, which is born out of Jñāna, came into existence later. The third view is neither Karma which is Asat nor Brahman (Jñāna) which is Sat came first. Both always exist together. Brahman which is called Ābhu is always covered by tuccha which is Karma (तुच्छेनाभ्वपिहितं यदासीत् । (ऋ.वे)). This is Sadasadvāda.

4. Abhikārivikalpa

29-31. This deals with Sat (Brahma) and Asat (Karma) separately. In this Jagat we have both Brahma (Jñāna) and Karma. Brahma is always Sat and is never Asat. On the other hand, we see both Sat and Asat in Karma. In the beginning it was not there. In the middle it was there and at the end it is not there. One view is that Karma is really Asat but it takes the form of Sat and makes its appearance. But since it is Asat by nature, its appearance as Sat cannot be considered as a reality. This is Asadvāda of this school.

Another view is that if even for a while it makes its appearance, we should think it was previously there and when it disappears it attains the state of Asat. But actually it cannot be called Asat. This is Sadvāda. The third view is Brahman is always Sat and is never Asat. Karma on the other hand is sometimes Asat and sometimes Sat and therefore Sadasat. This is Sadasadvāda.

5. Ātmagunavāda

32-33. In Vedic literature we come across the statements "सदेवेदमग्र आसीत्" in one place and yet in another place it is said "असदेवेदमग्र आसीत्" Yāgñavalkya tried to reconcile these statements in the following way.

In the creation process three entities are involved. They are Manas, Prāṇa and Vāk. Here manas is Sadasat (नैव सन्मनो न वा असत्-श.ब्रा) Prāṇa is Asat (ऋषिर्वै असदासीत् । के ते ऋषयः । प्राणा वा ऋषयः-श.ब्रा) and Vāk is Sat.

One view is Manas appeared first, Prāṇa then appeared and then only Vāk came into existence. This is Sadasadvāda. Another view is prāṇa appeared first and from that Manas and Vāk came into existence. This is Asadvāda. The third view is Vāk appeared first and then both Prāṇa and Manas came into existence. This is Sadvāda.

Yājñavalkya said that Vedic statements have to be interpreted keeping all these in mind. The correct interpretation would therefore be as follows:

Because there are three components involved in creation oriented Ātman viz. Manas, Prāṇa and Vāk, the

वाचः प्रसृष्टौ तु सदग्र आसीत् मूलं पृथक् पञ्चम एष कल्पः ॥ ३३ ॥
इत्यात्मगुणकल्पः ।

१०-पश्यामि यद्यत् तदिदं न पूर्वं कदाचिदासीदतिरिक्तमासीत् ।
यद्विद्यते प्राक् तदविद्यमानं सत् सर्वमादावसदाऽऽत्मनाऽऽसीत् ॥ ३४ ॥
भेदप्रतीताविह सर्वभावा भवन्त्यभावाश्च समञ्जसेन ।
यत् सत् तदेवासदिति प्रतीमोऽविरुद्धमित्यस्ति परो विकल्पः ॥ ३५ ॥
इति सामंजस्य विकल्पः ।

११-प्रधानमव्यक्तमसत् तदक्षरं तदुक्थ मेके प्रविदुः परे पुनः ।
अस्त्यक्षरं ब्रह्म तदस्ति कारणं स पूरुषोऽव्यक्त इहेष्यतेऽक्षरः ॥ ३६ ॥
असत् सतोरक्षरयोर्जगद्विधौ हेतुत्वमस्त्येकतरस्य भिन्नयोः ।
विद्याप्यविद्याप्यथवास्ति कारणं तदित्थमाहुर्मतमत्र सप्तमम् ॥ ३७ ॥
इत्यक्षरविकल्पः ।

---

correct thing would be to assume that all these three always go together. The statements one comes first and another came later have really no meaning. There are three streams associated with creation oriented Ātman and they are Jñānadhārā, Kriyādhārā and Arthadhārā. The Vedas say that in the creation of Jñānadhāra, Manas or Sadasat came into existence first, in the Kriyādhāra creation Prāṇa or Asat came into existence first and in the creation of Arthadhārā artha (Vāk) or Sat came into existence first. All these three statements are true and there is no contradiction in them.

6. Sāmanjasyavāda

34-35. The supporters of this school tried to reconcile the contradictory statements by suitably interpreting them.

The things we see at present were not there at an earlier time. Therefore the statement, असदेवेदमग्र आसीत् is justified. Since today they are there, they could not have come from nothing and something should have been there to give rise to the things we see now. That is why the Śruti says elsewhere 'सदेव सौम्येदमग्र आसीत्''. This means that the same thing is capable of assuming two forms viz. Sat and Asat and there is therefore no contradiction in the Vedic statements.

7. Aksaravāda

36-37. The Sānkhya school scholars believed in two distinct entities viz. Prakṛti and Puruṣa. Puruṣa is Sat and Prakṛti is Asat. In these Puruṣa is pure Jñāna and is devoid of any changes. But Prakṛti undergoes many changes and it is this that is responsible for creation. It is also called Avyakta, Pradhāna and also Akṣara whereas the Sānkhyas believe that Prakṛti is the source of creation and is Asat, the Vedāntins of the Vaidika school believed that creation is possible only from Sat and therefore it is Puruṣa who is actually responsible for creation. It is he who gives rise to Prakṛti or Avyakta or Akṣara and causes the creation. He is therefore the basic support for all creations. (एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्-उप). We may also say that both Vidyā and Avidyā play their roles in creation.

38. Thus the above seven Vādas increased to twenty one with the ramifications of Sat and Asat concepts.

तदित्थमुक्तः सदसत् प्रवादो विमर्शभेदैरिह सप्तकल्पः ।
एकैक कल्पे च पुनर्विकल्पैरेकाधिका विंशतिरत्र कल्पाः ॥ ३८ ॥

२-रजोवादः ।

आरम्भणं तत्त्वमिहोच्यते रजः सर्वाणि चैतानि रजांसि मन्महे ।
स्थाने तु यस्य क्रमते न चेतरत् स्वरूपतस्तन्मितमुच्यते रजः ॥ १ ॥
रजोऽणु, तच्च द्विविधं हि भूतं परक्रियं स्वक्रिय एष देवः ।
देवाश्च भूतानि च सृष्टयः स्युर्देवेषु भूतान्यपि तेषु देवाः ॥ २ ॥
भूतानि देवाश्च यथा यथा वाऽवस्थासु लोक्यन्त इमे हि लोकाः ।
सप्तैव लोका इह सन्ति यस्मात् सप्तैव दृष्टा रजसामवस्थाः ॥ ३ ॥
स्युर्भूर्भुवः स्वश्च महर्जनश्च तपश्च सत्यं खलु सप्त लोकाः ।
मृदम्बु तेजः पवनश्च वाक् च क्रियाश्च विज्ञानमिति प्रभेदात् ॥ ४ ॥
यद्वाऽत्र लोकास्त्रय एव बोध्या द्यौरन्तरिक्षं पृथिवीति भेदात् ।
सर्वस्य चास्य प्रभवः प्रतिष्ठा परायणं ते त्रय एव लोकाः ॥ ५ ॥
त्रयस्तु लोकास्त्रिवृतो ध्रियन्ते पृथ्व्येव पृथ्वी रविरेषु तु द्यौः ।
चन्द्रोऽन्तरीक्ष्यस्तदिहान्तरिक्षं प्रत्येकमेतद्धि पुनस्त्रिधा स्यात् ॥ ६ ॥
ज्योतिश्च गौरायुरिति प्रभेदात् सूर्यस्त्रिधेऽयं पृथिवी त्रिधा च ।
चन्द्रस्त्रिधा तैर्नवभिस्समस्तं व्याप्तं ततो जातमिहैव लीनम् ॥ ७ ॥

II. Rajovāda

1-2. According to this school Rajas is believed to be the primordeal substance (dust) that takes part in the creation of Viśva. Rajas is a particle which is so small in size that nothing else can share its place. It is of two kinds. One is made up of the material of the earth and is brought into existence by outside forces (Parakriyā). The second kind is brought into existence by forces from inside (Svakriyā). The creations are therefore of two types viz. Bhūtās and Devas. Bhūtas exist among Devas and Devas exist among Bhūtās.

3. Because Devas and Bhūtās are seen in their various states of existence their assembly is called loka. Since there are only seven lokas. Rajas has only seven states of existence. The Ṛgveda says that in the beginning from one unborn (Aja) were produced six types of Rajas (lokas) which were all supported by that one "वियस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ।" (R.V.1.164.6). Perhaps the belief that there are only seven states of Rajas orginates from the above statement.

4. The lokas are Bhūh, Bhuvah, Svah, Mahah, Janah, Tapah, Satyam. The states of Rajas in these lokas are 1. Mṛt (earth) 2. Ambu (water) 3. Tejas (fire) 4. Pavana (air) 5. Vāk (speech) 6. Kriyāh (actions) and Vijñāna.

5. Alternately we can conceive three lokas viz. Dyau, Antarikṣa and Pṛthivī. All things that exist here have their origin in these three lokas. They are all well established here and are nourished in these three lokas.

6. The lokas exist as a triad. Earth is located in Pṛthivī loka. The sun exists in the heavens. Candra's loka is Antarikṣa. Each of these is again divided into three types.

7. Jyotis, Gau, Āyus are the three things present in the sun. Vāk, Gau, Dyau are the three things

द्वैविध्यमेके त्वविदन् रजो वा परोरजा वा न ततोऽन्यदस्ति ।
रजोऽस्ति लोकोऽथ परोरजास्तु लोकातिगो यो जगतोऽस्ति भिन्नः ॥ ८ ॥
रजो नामरूपे रजसो यदेतत् पश्यामि तत् कार्यजगत्प्रसिद्धम् ।
अदृष्टमस्मात् पृथगस्ति किञ्चित् तत् कारणं तद्विदुरात्मशब्दम् ॥ ९ ॥
अनारतं कार्यमिदं स्वकारणे विलीयते कारणतः प्रजायते ।
उद्भूय कार्यं प्रतितिष्ठति ध्रुवे स्वकारणं चक्रमिदं प्रवर्तते ॥ १० ॥
स्थूलं च सूक्ष्मं च ततोऽतिसूक्ष्मं रजोऽस्ति सर्वं रजसामवस्थाः ।
अश्रान्तमेताः परिवर्तमाना जगत्स्वरूपाय भवन्त्यनन्ताः ॥ ११ ॥
रजो द्विधेदं गतिमत्तु किंचित् स्थितिं प्रयाति क्व च पारतन्त्र्यात् ।
किञ्चित् स्वभावात् स्थितिमत्तदेतत् गतिं प्रयाति क्व च पारतन्त्र्यात् ॥ १२ ॥
अग्निं वदिष्यामि गतिस्वभावं स्थितिस्वभावं तु वदामि सोमम् ।
अग्नेश्च सोमाच्च परस्परेण प्रयोगतः सर्वमिदं बभूव ॥ १३ ॥
अग्निर्न सोमेन विना क्वचित्स्यात्सोमोऽपि न त्वेव विनाग्निना स्यात् ।
परस्परेण व्यतिषक्तरूपौ प्राणौ जगन्निर्वहतः समस्तम् ॥ १४ ॥
गतिर्द्विधान्तस्त्ववहिष्ट्वभेदाद् बहिः प्रवृत्तिश्च निवृत्तिरन्तः ।
प्रवृत्तिरग्नेश्च निवृत्तिरग्नेरग्नेर्निवृत्तावगतिर्घनोऽन्यः ॥ १५ ॥

---

present in Pṛthivī. Retas, Yaśas and Śraddhā originate from Candra. All these pervade the solar system.

8. Another division of Rajas makes it into two kinds. They are called Rajas and Parorajas. Rajas is confined to this Viśva. Parorajas exists beyond this Viśva.

9. Rajas which is visible has name and form and is part of this Jagat which is Karya. However, the Rajas which is primordeal and is Kāraṇa is invisible. It is known by the word Ātman.

10. This Viśva comes into existence and after sometime gets destroyed and merges with its original source. This cycle of creation and destruction goes on for ever. During the time of its existence, this Viśva which is known as Kārya is supported by its Kāraṇa (source).

11. The visible Rajas is of three kinds viz. śthūla (gross) sūkṣma (subtle) and Atisūkṣma (very subtle). All these go to build this Viśva.

12. Rajas is again is of two kinds moving (gatimat) and stationary (Sthitimat). The former state is forced on it. Some by nature does not move. It moves only by external force.

13. What moves is called Agni and what is stationary is called Soma. The interactions of Agni and Soma have brought this Viśva into existence.

14. Agni and Soma never exist without each other. They are prānas which function in close association with each other and sustain this Jagat.

15. There are two types of motion, one is inward motion causing contraction. It is also called Nivṛtti. The other is outward motion causing expansion and is called Pravṛtti. Agni experiences both Pravṛtti and Nivṛtti. In the case of Nivṛtti it shrinks, becomes concentrated and motionless.

16. Rajas is of two kinds. Those which move out and those which shrink in. The former is called Agni and the latter is called Soma.

रजांसि सन्ति प्रसृतिस्वभावान्यन्यानि चान्यानि तु संकुचंति ।
प्रसारवत्स्वग्निपदं निरूढं संकोचवत्स्वस्ति च सोमशब्दः ॥ १६ ॥
यावद्रजः प्राणिति तद्विकासं याति प्रसारं गतमग्निमाहुः ।
यावद्रजोऽपानिति तत्समस्तं संक्षेपमायाति स सोम उक्तः ॥ १७ ॥
सोमस्तु योऽव्यक्तघनः पुरासीत् गतिर्न तत्रेति निविश्य तस्मिन् ।
प्रसारधर्मा गतिमान् परोऽग्निः प्रपंचयंस्तं विततं करोति ॥ १८ ॥
अव्यक्तमेतद्धि रजोऽग्निनामाऽव्यक्ते स्थिते सोमरजस्युपैति ।
प्रसारसंकोचकृतिप्रसर्गात् व्यक्तं भवद्विश्वमिदं विभाति ॥ १९ ॥
उन्मुग्धवैश्वदेव्यं सोमं विदुरत्र देवताः सर्वाः ।
अन्योन्यानुगतत्वादव्यावृत्तस्वरूपतः सन्ति ॥ २० ॥
प्रव्यक्तवैश्वदेव्यं त्वग्निस्ता यत्र देवताः सर्वाः ।
विश्‌कलिताः क्रमबद्धा नाम्ना रूपेण कर्मणा भिन्नाः ॥ २१ ॥
ऋषयः पितरो देवा असुरा गन्धर्वमानवा इत्थम् ।
याः प्राणदेवतास्ताः रजसां भेदे निमित्तानि ॥ २२ ॥
संयोगतोऽपि रजसां वियोगतोऽप्यत्र भिन्नतोदेति ।
या भिन्नता स लोकस्तद्धि रजस्तन्मयं विश्वम् ॥ २३ ॥
कालात्स्वभावादथ कर्मणस्ते भवंति यानत्र विलोकयामः ।
कालाभिधानं रविचन्द्रपृथ्वीगतिक्रमाणां च मिथोऽनुयुक्ते ॥ २४ ॥

---

17. Prānana of Rajas is characterised by outward movement and what moves out is calld Agni. When contraction takes place, it is called Apānana. In this process the Rajas gets concentrated and we call it Soma.

18. The initial state of Soma is of unmanifest concentrated form. It is also motionless. Agni which is mobile gets into it and brings it out to the forefront.

19. Unmanifest Agni Rajas enters into unmanifest Soma Rajas. Because of the spreading of the former and contraction of the latter the manifestation of Viśva takes place (अग्नीषोमात्मकं जगत्).

20. All the Viśvedevas are dormant in Soma. Here all the Devatās (Devaprāṇas) get established without getting separated from each other.

21. When the Devatās get manifested they all constitute Agni prāṇas. In this condition they get separated and individualised by name, form and action.

22. Ṛṣis, Pitṛs, Devas, Asuras, Gandharvas and Manuṣyas are made of different kinds of Rajas and they constitute individualised Prāṇa Devatās.

23. While getting united and getting separated the Rajas gets differentiated from each other. These different forms of Rajas give rise to the lokas. This Viśva is nothing but the collection of lokas.

24. Whatever we see in this Viśva, they are characterised by Kāla (time) Svabhava (nature) and Karma. Sūrya, Candra and Pṛthivī cause Kāla by their orderly motion.

25. Some things are part of Nature. Agni gives rise to flame which moves upward. Water always comes down. Pṛthivī is Agni loka. Varuṇa is the loka of waters. They move out of their loka and move

स्वभावतोऽर्थाश्च भवन्ति केचिद् वन्हिर्ज्वलत्यूर्ध्वमधोऽम्बु याति ।
पृथ्व्यग्निलोको वरुणोऽम्बुलोकः स्वलोकतो दिक्ष्वभितः क्रमन्ते ॥ २५ ॥
स्युः कर्मणा केऽपि यथा घटोऽयं गृहं च वस्त्रं गमनाशनादि ।
भिन्नास्ववस्थासु हि भिन्नता धीर्लोको ह्यवस्था रज एव लोकः ॥ २६ ॥
यद्यदकस्माद्देवादीशाद्वा कालतस्तु तद्विद्यात् ।
एष स्वभाव एव प्रकृतिर्नियतिर्यदृच्छा या ॥ २७ ॥
यस्य न कालो नियतो न वस्तुधर्मोऽस्ति कर्मणा तत् स्यात् ।
कालस्वभावकर्म्मस्वेवेदं सर्वमाहितं भाति ॥ २८ ॥
"कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माऽप्यनीशः सुखदुःखहेतोः" ॥ २९ ॥ (श्वे.उप.१.२)

३-व्योमवादः ।

या चामृता वाक् परमं तदास्ति व्योमापि तद् वेदचतुष्कमस्ति ।
या वेदवाचस्तत एव विश्वं जज्ञेऽस्य तद् व्योम गतिः प्रतिष्ठा ॥ १ ॥
पृथिव्यहर्मण्डलगास्ति भानोर्भानुः समुद्रे क्वचिदप्सु भाति ।
व्योम्नि स्थितोऽसौ परमे समुद्रे व्योमैव तस्मात् परमा गतिर्नः ॥ २ ॥
साम्नः स्वरः प्राण इतोऽन्नमापः स्वर्भूमिराकाश इति क्रमेण ।
संस्तावयन् व्योम्नि गतिं स्वमेव प्रवाहणो जैवलिराह सत्यम् ॥ ३ ॥

around in space.

26. It is Karma that differentiates the lokas just like house cloth, food are all differentiated by their Karmas. Because of their different states of existence we become aware of their differences. Lokas are nothing but Rajas.

27. Whatever occurs accidentally, or by the will of Īśvara or Kāla they should all be considered as routine things and are part of Nature and its functioning.

28. Every happening is either part of Nature or occuring at a destined time or as a result of inherent dharma. If all the above things are ruled out, it occurs as a result of Karma. No other reason exists outside these.

29. Ojha closes Rajovāda after quoting a passage from Śvetaśvataropanisad which brings to the forefront the power of Kāla, Svabhava (nature), Niyati (order), Accidentality, Bhūtas and Puruṣa acting together and causing an event. Jīva by himself is subjected to sukha and duhkha and therefore cannot cause an event.

III. Vyomavāda

1. The highest space is the region of Amṛtā (immortal) Vāk. It is the region of the four Vedas. This Viśva has its origin in this Vedavāk. It is its support and its final abode.

2. This Pṛthivī resides in Sūryamandala. The sun is stationed in the ocean of (primordeal) waters. This ocean is Paramavyoma. Therefore Paramavyoma is our final and highest abode.

3. This versa refers to a passage in Chāndogyopaniṣad. Whereas all others said Sāma has its final gati in Svara, Praṇa, Anna, Āpah, Svah and Bhūmi, it was Pravāhaṇa who said correctly that Ākāśa is the final gati of everything. (का साम्नो गतिरिति? स्वर इति होवाच । स्वरस्य का गतिरिति? प्राण इति होवाच । प्राणस्य का गतिरिति? अन्नमिति होवाच । अन्नस्य का गतिरिति? आप इति होवाच । अपां का गतिरिति? असौ लोक इति होवाच । अमुष्य लोकस्य का गतिरिति?) It is here Pravāhaṇa said, आकाश एवास्य लोकस्य गतिः । (छा.उप.1.8.4; 1.9.1).

व्योम्नो हि भूतान्यखिलानि भूत्वा व्योम्न्येव यान्त्यस्तमिमानि काले ।
परायणं व्योम ततोऽखिलानां ज्यायश्च तद् भूतकुलेभ्य एभ्यः ॥ ४ ॥
गतिः पृथिव्या जलमस्य तेजस्तस्यापि वायुर्वियदस्य वायोः ।
यदस्ति किञ्चिद्ध्रुवमस्य सर्वस्याकाशमेवास्ति परायणं तत् ॥ ५ ॥
पृथ्वी प्रतिष्ठा द्युरिदं प्रतिष्ठा तयोः प्रतिष्ठास्ति समुद्र एषः ।
तेषां च वेदत्रितयं प्रतिष्ठा तद् व्योम तद् व्योम परा प्रतिष्ठा ॥ ६ ॥
नाम्ना च रूपेण च कर्मणा च प्रभेदतो वस्तुनि संप्रतीतिः ।
नाम्नश्च रूपस्य च कर्मणश्च व्योमैव निर्वाहकमेकमस्ति ॥ ७ ॥
रूपं व्यवच्छेद इहैष नर्ते व्योम्नोन्तरस्थादवकाशतः स्यात् ।
द्रव्यं व्यवच्छिन्नमिहास्ति यत्तद् वागस्ति यद्वाक्प्रभवं च भूतम् ॥ ८ ॥
नामानि वाक् सा विभवत्यनन्ता तामेव चाकाश इति ब्रुवन्ति ।
कर्मापि नाकाशमृतेऽवकाशं धत्ते स्वरूपग्रहणाय किंचित् ॥ ९ ॥
तस्माद् ध्रुवं यद्यदिहास्ति किञ्चित् सर्वं तदकाशमिति ब्रवीमि ।
आकाश एव प्रभवः प्रतिष्ठा परायणं तन्मयमस्ति सर्वम् ॥ १० ॥
व्योम द्विधोक्तं परमं तु तत्रामृतं स इन्द्रः स हि देवयोनिः ।
इन्द्राद्धि देवाः प्रभवन्ति तेषां द्यौः स्थानमेतेऽपि चरन्ति भूमौ ॥ ११ ॥
अथापरं व्योम तु भूतयोनिर्मर्त्यं तदाकाशपदप्रसिद्धम् ।
भूस्थानि भूतानि भवन्ति वाचस्तान्युत्क्रमन्ते दिवि चानुषङ्गात् ॥ १२ ॥

4. All bhūtas come out of Ākāśa and get merged there ultimately after their time of stay here is over. So Vyoma (Ākāśa) is the final place of attachment for all bhūtas. It is therefore superior to all bhūta regions.

5. The final gati of Pṛthivi are waters. The gati of waters is Agni which has its gati in Vāyu and gati of Vāyu is Ākāśa. Therefore Ākāśa is the final abode or place of attachment (Parāyana) for everything.

6. Pṛthivī is the Pratiṣthā (seat of support) of all bhūtas. The upper heaven is the Pratiṣthā of Devas. Samudra is the Pratiṣthā for both the above. Vedatrayī (Ṛk, Yajus, Sāma) is the Pratiṣthā of all the above three. Vedatrayī has Pratiṣthā in Vyoma and therefore Vyoma (Ākāśa) is the highest Pratiṣthā.

7. Nāma, Rūpa and Karma give us clear knowledge of what a thing is. These three are controlled by Ākāśa only. That is, the interspace between things enables us to identify them.

8. The form of every body is discernible to us because of the interspace between the bodies. The material content of each is discernible only due to finitisation of Vāk (matter) in the body. All bodies are made of Vāk only.

9. It is Vāk that results in various forms and pervades space through Vibhūtiyoga and all names arise from it. Vāk is called Ākāśa. No Karma except Ākāśa can make the size and form of a body discernible.

10. Therefore whatever is stable here I will declare that is all Ākāśa. Ākāśa is the source Pratiṣtha and Parāyana (final place of attachment) to everything.

11. Ākāśa is of two kinds, viz. Paramavyoma and Aparavyoma. Paramavyoma is amṛta. It is Indra. It is the origin of Deva Praṇas. It is from Indraprāṇa, all the other Devaprāṇas come into existence. Their region is upper heaven but they move down to earth also.

12. Aparavyoma is martya and is the origin of bhūtas. It is called Ākāśa. All the bhūtās here are made

देवाश्च भूतानि च सर्वमेतन्नातः परं किंचिदिहास्ति नाम।
ये चोभयेषां विविधा विशेषा मिथोऽन्वितास्तज्जगदेतदस्ति ॥ १३ ॥

४-अपरवादः ।

आपोमयं सर्वजगद् यदुक्तं न तत्र नो विप्रतिपत्तिरस्ति।
अपि त्वमूर्वाक्प्रभवा अमूर्षा वाचि स्थितिर्वाक् परमा गतिश्च ॥ १ ॥
वागेव विश्वं जनयत्यमुष्मिन् व्याप्नोति नातः परमस्ति किंचित्।
वाचो मुखेनैव तु वाग्विभूतिं वागाम्भृणी प्रागृषिका व्यवोचत् ॥ २ ॥
"अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥
अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥
अहं रुद्रेभिवसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्मि अहमिन्द्राग्नी अहमश्विनोभा ॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं श्रृणोत्युक्तम्।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥" (ऋ.वे.१०/१२५) ॥
वागेव सा व्योमपदप्रसिद्धा व्योमापरं तत् परमं च भिन्नम्।
तत्रापरं व्योम निरुक्तमेतद् वागाम्भृणी या खलु सास्ति मर्त्या ॥ ३ ॥

up of martyā vāk and are confined to the earth. But by contact they move up also.

13. Both Devas and bhūtas constitute Ākāśa only. There is nothing else here except these bhūtas and Devas. Jagat is nothing but the place of various kinds of interaction of Bhūtas and Devas.

IV. Aparavāda

1. When it is said that the whole Jagat is of the form of water, we have no difficulty in conceiving it. But when it is said that Vāk fills space, everything is made up of Vāk, everything rests on Vāk, and Vāk is the final gati of everything, we find it difficult to conceive.

2. The whole Jagat is Vāk. That Vāk builds this Viśva. It pervades everywhere. It is Āmbhṛnī Vāk that causes all the greatness for Vāk. This is what the seer ऋषिका says. She says.

"I breath a strong breath like the wind and I am responsible for all that exists here. I am mighty beyond the earth and beyond the heaven. I bring forth the father in the world and reside in waters in the deep ocean. I extend over all existing creatures and my head touches the heavens.

I move with the Rudras and the Vasus and move about also with Ādityas and all gods.

I support both Varuṇa and Mitra above and also Indra and Agni and the pair of Aśvins.

Through me all eat food which feeds them. Everybody who sees, breaths, hears, what is spoken.

They do not know that they dwell by my side and hear everything I speak.

५-आवरणवादः ।

प्राणाः पृथक् प्राणविशेषपूगानावृण्वते ते प्रभवन्ति भावाः ।
तत्रेदमेवावरणं प्रधानं वृतेर्ऋते क्वापि न वस्तुबुद्धिः ॥ १ ॥
आच्छादनं वैवसनं ततो यद्रूपं भवेद्वस्त्विति तद्वदामः ।
ज्योतिश्च यज्ञं वयुनं विकल्प्य त्रैविध्यतो वस्तु निरूपयामः ॥ २ ॥

वयुनम् ।

अस्ति त्विदं वस्त्विति रूपतो यद्विज्ञायते तद्वयुनं वदामः ।
विज्ञानमेतद्वयुनं तदन्तर्वयो वयोनाध इमे तु सत्ते ॥ ३ ॥
तद्वै वयो वस्तुनि येन भारस्तथा वयोनाध इहास्ति सीमा ।
सीमापि रूपं च वयोऽपि रूपं नाभ्यां परं किञ्चिदिहास्ति वस्तु ॥ ४ ॥
छन्दो वयोनाध इति प्रतीयादन्नं वयश्छन्दसि तद्धि नद्धम् ।
छन्दस्य भेदाच्च वयस्य भेदाद् वस्तूनि भेदेन विलोकयामः ॥ ५ ॥
मृत्पिण्डमादाय हि कारुको गजं हयं रथं कंसमथान्यथा वहु ।
शिल्पं विनिर्माति न मृद्विभिद्यते भिन्नाकृतिस्तेन गजाश्वभिन्नता ॥ ६ ॥
सर्वो लिपिं लेखयतेऽनुरूपं ब्रूतेऽनुरूपं कुरुतेऽनुरूपम् ।
नाकार एष ध्रियते धिया चेत् सा प्रत्यभिज्ञैषु भवेन्न जातु ॥ ७ ॥

I myself speak the words that is welcome to gods and men. I make whomsover I like, mighty. I make him a sage, a Ṛṣi and Brahman." (R.V.10.125)

3. What is called Parama Pada is Amṛtāvāk. Aparā vāk is different from it and is martya. Apara Vyoma is martya and is filled with martyavāk which is called Āmbhṛṇī.

V. Āvaraṇavāda

1. Prāṇa makes a cover on the collection of Prāṇas and this covered form constitutes different substances in this Viśva. It is āvarana that constitutes the most important thing on every substance. Without this āvarana we will not be able to identify the substance.

2. Covering is the dress on every substance and this covered thing is called a Vāstu. It is described by three things viz. Jyoti, Yajñā and Vayuna.

Vayuna

3. Any substance which makes it known to us by its characteristic form is called Vayuna. This is the scientific concept of any substance and is characterised by two things viz. Vaya and Vayonādha which constitute the two Sattās.

4. Vaya is that which is the material solid part of the body. Vayonadha is its limit. Everybody can be fully defined by these two parameters viz. Vaya and Vayonādha.

5. Chandas constitutes Vayonādha and Vaya is the Anna (matter) part of the body. Because of the differences in the above two characteristics of the body, everybody differs from another as we see them.

6. The artisan takes earth and makes out of it various figures like elephant, horse, chariot and many

ज्योतिः ।

विद्योतते यत्स्वयमेतदाहुर्ज्योतिर्यथा भास्कर एष भाति ।
द्वयङ्गं हि तत् कन्दलमस्य नाभौ ततो बहिस्त्वावरणं समन्तात् ॥ ८ ॥
स्वतः प्रकाशः परतः प्रकाशो रूपप्रकाशस्त्रिविधा इहार्थाः ।
सर्वत्र नाभौ ध्रियतेऽर्थबिम्बः स्वच्छायया चाव्रियते स नित्यम् ॥ ९ ॥

यज्ञः ।

कृत्स्नो हि वाक्प्राणमनोमयोऽर्थो, वाक् प्राणतः स्यात्, स भवेन्मनस्तः ।
वाक् क्षीयते द्यौर्हि भुनक्ति सर्वान् भुङ्क्ते ततोऽन्नं परतः स वाचम् ॥ १० ॥
अन्नात्पुनः प्राण उदेति तस्मान्मनस्तदित्थं परिवृत्तिचक्रम् ।
वाचो मनस्तन्मनसः पुनर्वाक् प्रवृत्त इत्थं क्रम एव यज्ञः ॥ ११ ॥
यद् दृश्यते किञ्चिदिहैष सर्वः पृथक् पृथग् यज्ञ इति प्रसिद्धिः ।
प्रजापतिर्वेद इति द्विधायं विभज्यते यज्ञ इति प्रतीयात् ॥ १२ ॥
अनावृते व्योमनि यावदीक्षे यावद्विदूरात्प्रतिपत्तिरक्ष्णा ।
तद्वस्तुनस्तावदवन्ति वेदा न वस्तुनोऽस्तिः पृथगस्य वेदात् ॥ १३ ॥
इमे प्रवृत्ता यत एव वेदा प्रजापतिः सोऽस्ति स एष आत्मा ।
वेदास्तु यावन्त इमे तदस्यात्मनः शरीरं पुरुषोऽस्त्युभाभ्याम् ॥ १४ ॥

---

other things. But we know all are made of the same earth only.

7. All write letters in the same way. They talk the same thing and act in the samy way. But if we cannot understand the individual letters and the words made out of them, we won't be able to communicate with each other about anything.

Jyoti

8. Whatever shines by itself, and makes itself visible, is called Jyoti. For example the sun constitutes Jyoti. The central core is surrounded by rays which form the āvaraṇa of the core.

9. Those that shine are of three kinds viz. 1. self-luminous 2. illuminated by another source and 3. exhibition of form or figure (rūpaprakaśa). The central core is always covered by its own shadow.

Yajña

10. Whatever we see here is of the form of manas, prāṇa and vāk. Manas gives rise to Prāṇa and Prāṇa gives rise to Vāk. Vāk goes on changing its form and therefore loses itself in space. Vāk which is a form of anna pervades space.

11. From Anna Prāṇa is again produced. From Prāṇa manas is formed. In this way the cycle continues. This is called Yajña.

12. Whatever we see here individually each one of them constitutes Yajña. Prajapati divides himself into two parts. One is Yajña and another is Veda.

13. When we observe the sky and direct our vision to the deep interior region of the sky, we see things through Veda only. Without Veda, things do not exist.

वेदास्त्रिधर्क्सामयजुःप्रभेदात् सूक्ष्मोत्तरा मूर्तय एव चर्चः ।
ऋग्व्याप्तिमत्सर्वदिगंशसाम्यं साम प्रसारः स ऋचा क्रमेण ॥ १५ ॥
यजुस्तु यज्जूरथवेन्द्रवायू सोमानदन्तोऽग्नय एव वायुः ।
देवास्त्रयस्त्रिंशदिहाग्नयः स्युः प्रत्येकतस्ते सहितास्तु वायुः ॥ १६ ॥
प्राणाश्च वाचश्च मनांसि चैते देवा इहाऽपि क्रमतोऽनुवेलम् ।
वाचो मनस्तन्मनसः पुनर्वाग् भवत्यतो देवतनुः स यज्ञः ॥ १७ ॥
आवरणवाद एव छन्दोवादश्च वयुनवादश्च ।
स प्राणवाद एवं स वयोवादश्च शक्यते वक्तुम् ॥ १८ ॥

६. अम्भोवादः ।

त्रैलोक्यमुक्तं जगतः स्वरूपं पृथ्व्यन्तरिक्षं द्युरिति प्रभेदात् ।
सूर्यस्त्रिलोकी पतिरेष सूर्यो नारायणो भाति समुद्रमध्ये ॥ १ ॥
समुद्रतोऽजायत एष सूर्यस्तत्रैव संतिष्ठत एष पश्चात् ।
अर्वाक् च सूर्यात् परतस्तथाऽऽपो दृश्यन्त आपोमयमस्ति विश्वम् ॥ २ ॥
"या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ।
तास्वेवायं जायमानोऽग्निरूपः सूर्यस्ताभिर्विश्वमेतद् व्यधत्त" ॥ (य.सं.१२.४९)
त्रयोऽपि लोकास्त्रिवृतो य उक्तास्तेभ्यो वहिर्धास्ति चतुर्थलोकः ।
अपां समुद्रोऽस्ति स तस्य गर्भे जज्ञेऽयमग्निः खलु या त्रिलोकी ॥ ३ ॥

14. These Vedas originate from Prajapati. He is Ātmā. These Vedas form his Śarīra. Prajapati is made up of Ātmā and Śarīra or Ātmā and Veda.

15. Vedas are three kinds viz. Ṛk, Yaju and Sāma. Ṛks constitute the mūrtis which become smaller and smaller with increasing distance when ṛks move equally in all directions it constitutes Sāma. Sāma is the propagation of ṛks.

16. Yajus is made up of two things viz. यत् and जू. They are इन्द्र and वायु. Vāyu is that form of Agni which consumes Soma. Agni is the form of thirty three Devas. They are collectively of Vāyu (prāṇa) form.

17. In the moving Vāyu, Prāṇa, Vāk and Manas which are Devaprāṇas, reside. Vāk gives rise to Manas and Manas gives rise to Vāk. This Yajña is the śarīra of the Devas.

18. Avaraṇavāda is the same as Chandovāda and Vayunavāda. We can also call it Prāṇavāda and Vayovāda.

VI. Ambhovāda

1. The Trilokya consists of three lokas viz. Pṛthivī, Antarikṣa and upper heaven. Sūrya who is the lord of Trilokya shines in the midst of a Samudra.

2. Sūrya was born from the ocean. He is stationed in the ocean. On the other side of Sūrya lies the ocean of waters which means that the Viśva is āpomaya.

The Veda says that Sūrya was born from an ocean of waters which surround him above and below. He made this Viśva out of that waters.

3. Beyond the three lokas lies the Apoloka which is the fourth loka. It is an ocean of waters from

"आपो भृग्वङ्गिरो रूपमापो भृग्वङ्गिरोमयम् ।
सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयम् ॥
अन्तरैते त्रयो वेदा भृगूनङ्गिरसः श्रिताः ।" (गोपथ ब्रा.)
य इहाभिखनेत् सोऽपो विन्दति भूमौ दिवश्च वर्षन्ति ।
ता यत् परमे स्थाने तिष्ठन्त्यत एव परमेष्ठी ॥ ४ ॥
परमेष्ठिनोऽस्ति गर्भे सर्वं विश्वं ततः प्रसूतं च ।
ब्रह्मैतत् परमेष्ठि प्रभवस्थितिभङ्गकारणं तस्य ॥ ५ ॥
यदस्ति किञ्चिज्जगदस्य मूलद्रव्यं विदुर्ब्रह्मपदेन विज्ञाः ।
किं ब्रह्म नामेति विचारणायां न त्वम्भसोऽन्यत्परितर्कयामि ॥ ६ ॥
तिर्यग्गतिश्चोर्ध्वगतिस्तथाधोगतिश्च तत्राम्भसि सत्यसृष्टिः ।*
परं परं यद्यधिकावकाशं गृह्णाति सोर्ध्वा तनुता ततः स्यात् ॥ ७ ॥
अल्पावकाशं भजते क्रमाच्चेत् साऽधोगतिस्तेन घनत्वमेति ।
तिर्यग्गतिस्तद्गतिसाम्यतः स्यान्नाऽतस्तनुत्वं न घनत्वमेयात् ॥ ८ ॥
इत्थं तनुत्वक्रमतः प्रथन्तेऽग्निवायुवाक्प्राणमनांसि चाद्भ्यः ।
घनत्वयोगात् क्रमतः पृथिव्या वृक्षाः शरीराणि च संभवन्ति ॥ ९ ॥
घनं द्रवीभूय तनुत्वमेयात् तनु द्रवीभूय घनत्वमेयात् ।
प्रवर्तते चक्रमजस्रमेतन्मध्ये तदालम्बनमम्बु विद्यात् ॥ १० ॥

* अप एवेदमग्र आसुः । ता आपः सत्यमसृजन्त । सत्यं ब्रह्म । ब्रह्म प्रजापतिम् । प्रजापतिर्देवान् । ते देवाः सत्यमित्युपासते ॥ (श.ब्रा.१४.८.६)

which the Trilokī was formed which is of Agni type.

The Gopatha Brahmana says that, the waters are of Bhṛgu and Angiras form. All bhūtas are formed out of waters and are nothing but Bhṛgu and Angiras. In between the Vedas operate and they influence the Bhṛgu and Angiras.

4. The waters that are found on the earth are waters which have reached us through rain. But the waters of Parameṣthiloka which is located above all these is of different type. It is called Parameṣthī because it is located in the highest place.

5. It is in the womb of Parameṣthi that the Viśva was born and this Parameṣthi Brahman is the origin, place of stay and cause of destruction of this Viśva.

6. Wisemen ask themselves what is the root substance that goes to make this Viśva and the answer they get is Brahman. If you ask what is that Brahman, I cannot think of any other substance except waters which we are naming as Brahman.

7. Waters go up, come down and also move sideways. As it moves up it becomes thinner and thinner. It is in these waters Satya sṛṣṭi takes place.

8. When it comes down quickly, it becomes dense. But when it moves sideways, neither becomes thin nor dense.

9. When waters get subtler and subtler, Agni, then Vāyu and then Vāk, Prāṇa and Manas are formed out of them. When they become denser and denser, they give rise to the formation of Pṛthivī, trees and śarīras.

आपो हि भूयिष्ठतमाः पृथिव्यामापो हि भूयिष्ठतराः शरीरे ।
भूयः प्रवर्षेण च भूयसान्नं ततो जगद् ब्रह्म निरूप्यतेऽम्भः ॥ ११ ॥

७-अमृतमृत्युवादः ।

अमृतं मृत्युरिति द्वयमेतद्विश्वस्य मूलमिति विद्यात् ।
अविनाशि स्थितिलक्षणममृतं गतिमान् विनश्वरो मृत्युः ॥ १ ॥
अमृतं सोमः स रसो नित्यस्तत्रोदितं बलं मृत्युः ।
भूत्वा भूत्वा काले नश्यति सोऽग्निः स च द्विविधः ॥ २ ॥
सोमं गृह्णन् घनतां जनयन् नित्यं घनस्थितोऽर्थोऽग्निः ।
उच्छिन्दन्घनतां पुनरुत्क्रममाणो यमः स मृत्युरिति ॥ ३ ॥
यदमृतमृत्युद्वयमिदमुक्तं द्वेधा पुनस्तत् स्यात् ।
मर्त्यं द्वन्द्वं कार्यं कारणमन्यत् तथामृतं द्वन्द्वम् ॥ ४ ॥
रसाद् भवन्तीह बलप्रभावान्मर्त्यानि मृत्योरमृतेन योगात् ।
तानि त्रिधाग्निश्च यमश्च सोमश्चैतेभ्य एवाऽखिलविश्वसृष्टिः ॥ ५ ॥
मृत्युर्यमः सोम इहामृतं स्यादग्निश्च मृत्युश्च तथामृतं च ।
भूतानि मृत्योरमृताच्च देवास्तेषूभयेष्वग्निरयं निविष्टः ॥ ६ ॥
चिरं यदस्त्येकमिदं प्रतीतं सर्वत्र तं विद्ध्यमृतप्रभावम् ।
न चास्ति पूर्वक्षणवत्परत्र क्षणे विकारः स हि मृत्युभोगः ॥ ७ ॥

10. What is dense becomes thin and what is thin becomes dense and becomes liquid. In other words, conversion of water into vapours and vapours into waters go on taking place.

11. Waters form the predominant substance on the earth. Our bodies contain predominantly waters. Rain produces food and everything in this Jagat is waters and Brahman is nothing but waters.

VII. Amṛta-Mṛtyuvāda

1. Amṛta and Mṛtyu are the root causes for the coming into existence of this Viśva. Amṛta is something which is ever present and Mṛtyu is something which is ephermeral and moving.

2. Soma is Amṛta. It is Rasa which is ever present. The bala that appears on it is ever changing. It is mṛtyu type. Agni comes into existence and then gets destroyed. It is of two types.

3. Agni joins with Soma and becomes dense and becomes solid substances with Agni embedded in them. When it loses its solid state it moves up as Yama and becomes mṛtyu.

4. Martya and Amṛta again are of two kinds viz. Kārya and Kāraṇa.

5. Balas are produced on Rasa and they bring into existence martya substances. Mṛtyu joins Amṛta and give rise to three substances viz. Agni, Yama and Soma. These are responsible for the creation of Viśva.

6. Yama is mṛtyu. Soma is amṛta. Agni is both mṛtyu and amṛta. Bhūtas are produced from mṛtyu. Devas are produced from Amṛta. In both Agni enters and plays its role.

7. Whatever remains the same all the time without change is Amṛta. Whatever goes on changing all the time is Mṛtyu.

अग्नेरयं जीवति जायतेऽमृतान्मृत्युर्विनश्यत्यमृताच्च मृत्युतः ।
अन्यान्यरूपे परिणामसंभवः प्रत्यर्थमित्थं त्रिभिरिष्यते क्रमः ॥ ८ ॥
स्वलक्षणं च क्षणिकं च दुःखं शून्यं यदत्राभिमतं स मृत्युः ।
पूर्णं सुखं शाश्वतिकं च मन्येऽमृतं बलं तस्य तु लक्षणं स्यात् ॥ ९ ॥
शान्तिः सुखं तद्धयमृतं रसः सः क्षोभोऽस्ति दुःखं बलमेव मृत्युः ।
समन्वितं भाति समस्तमाभ्यां ततोऽमृतं मृत्युरशेषमूलम् ॥ १० ॥
रसो बलं चेत्यमृतं च मृत्यू रस प्रधानान्यमृतानि सृष्ट्याम् ।
बलप्रधानास्त्विह मृत्यवः स्युर्न मृत्यवः सन्त्यमृतातिरेकात् ॥ ११ ॥
"अन्तरं मृत्योरमृतं मृत्यावमृतमाहितम् ।
मृत्युर्विवस्वन्तं वस्ते मृत्योरात्मा विवस्वति" ॥ (शत.ब्रा.)

८-अहोरात्रवादः ।

"ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारणम् ।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥" (पुण्याहवाचनम्)
"युगसाहस्रपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥"
अभावभावौ प्रलयप्रसर्गौ द्यावापृथिव्यौ द्युरथाग्निसोमौ ।
अबोधबोधौ तिमिरप्रकाशौ सितासितौ यज्ञविकल्पनाश्च ॥ १ ॥
सप्त प्रकारो व्यपदिश्यतेऽहोरात्रः स वै शाश्वतिकोऽस्त्यनन्तः ।
यैषास्त्यहोरात्रपरम्परा तां वदामि विश्वं परमेश्वरं वा ॥ २ ॥

8. Agni gives life in this Viśva. Amṛta destroys Mṛtyu. Amṛta and Mṛtyu act together and result in the formation of various things. These are the three processes which produce the various things.

9. What is defined by itself, what is ephemeral what is duhkha, what is śūnya constitutes Mṛtyu. On the other hand, what is full, permanent and gives joy is Amṛta. Bala is its lakṣana.

10. Śānti, Sukha are the characteristics of Amṛta which is Rasa. Decay, duhkha and bala constitute Mṛtyu. Amṛta and Mṛtyu go together and they together produce the various things in this Viśva.

11. Rasa is Amṛta and Bala is Mṛtyu. When Rasa is predominant in creation process, it gives rise to Amṛta substances when bala is predominant, then it gives rise Mṛtyu substances. Mṛtyu is ineffective when Amṛta is predominant.

The Satapatha Brāhmana says,

"Mṛtyu lies in midst of Amṛta. Amṛta lies in the midst of Mṛtyu. Mṛtyu resides in the sun and the Ātmā of Mṛtyu is in the sun."

VIII. Ahorātravāda

The holy day is the day when the Vedas came into existence and the creation process commenced. For Brahman the day is of the duration of thousand yugas. In the same way, night for him is again of the same duration (thousand yugas).

भावं विदुर्ज्योतिरहस्तदीक्षेऽभावस्तमोरात्रिरिहास्ति नित्या ।
सैषा महारात्रिरिति प्रसिद्धा व्यावर्ततेऽहन्यपि सा न रात्रिः ॥ ३ ॥
यः सृष्टिकालः स हि सूर्ययोगाज्ज्योतिस्ततोऽहः स हि कल्पमात्रः ।
रात्रिस्तमः सृष्ट्यवसानकालः सा कालरात्रिर्न हि तत्र सूर्यः ॥ ४ ॥
अग्निः स्वयंज्योतिरहस्ततस्तत् सोमः स्वतो भाति न तेन रात्रिः ।
सोमोऽग्निना मुह्यति मोहरात्रिस्ततोऽग्निसोमाविह सृष्टिहेतुः ॥ ५ ॥
पिण्डः स्वयंज्योतिरयं रविर्द्यौरहस्तदेषा पृथिवी तु रात्रिः ।
ज्योतिर्गतिप्रत्यवरोधकत्वात् सा दारुणा निष्ठुरताधिकत्वात् ॥ ६ ॥
त्र्यहेण तु द्यौ स्त्र्यहतश्च पृथ्वी विश्रामरात्रिः सुखरात्रिरेषा ।
ज्योतिश्च गौरायुरिति त्र्यहं द्यौर्वाग्गौरथ द्यौस्त्र्यहमस्ति पृथ्वी ॥ ७ ॥
यत्रापवर्गः सुखरात्रिरन्या सा ज्ञानजन्या परमं सुखं तत् ।
अज्ञानजन्यं तु भवत्यहस्तद् यत्रोदितः संसृतिचक्रबन्धः ॥ ८ ॥
सूर्यादितो ज्योतिरुदेत्यहस्तत् तज्ज्योतिषां विप्रलयस्तु रात्रिः ।
अहश्च शुल्कोऽथ च कृष्णवर्णो रात्रिर्हि सा साऽपि च भूतरात्रिः ॥ ९ ॥
स्तोमा अहस्तोमविभक्तिरेवं यज्ञस्य रात्रिः शिवरात्रिरेषा ।
स्तोमेषु देवाः प्रतिरात्रिभक्ता भूतानि रात्र्या अभवन्निमानि ॥ १० ॥

1-2. Ahorātra (day-night pair) can be conceived in seven ways. They are, 1. existence and non-existence. 2. creation and destruction 3. heaven and earth. 4. Agni and Soma 5. Unknown and Known 6. light and darkness and 7. white and black.

The above kinds of Ahorātra apply to Viśva and Parameśvara.

3. Ojha then gives the meaning of Bhāva and Abhāva. Bhāva means the presence of Jyoti. Abhāva is the darkness which is always there when Jyoti is not there. Maharātri is that darkness which occurs even during the day is not the same darkness which we have described above.

4. When Sṛṣṭi takes places, then the light we get from the created Sūrya marks the commencement of day which has the duration of Kalpa. When Sṛṣṭi meets with its end then the darkness that comes into existence is the Kāla Ratrī. At that time there is no Sūrya.

5. Agni is self-luminous. Ahas is caused by that. Soma is not luminous. It therefore causes night. When Soma gets infatuated with Agni then there is Moharātri. Soma and Agni cause creation.

6. The Sun above is a self-luminous body. It constitutes Ahas and Pṛthivī is Rātrī. When sunlight is scattered by solid earth then it becomes oppressive.

7. The heaven has three Ahas viz. Jyoti, Gau and Ayus. Similarly Pṛthivī has also three Ahas viz. Vāk, Gau, Dyau. As a result of both we have Viśrāmarātrī and Sukharātrī.

8. That Ahas which gives Mokṣa is Sukharātrī. That Ahas which gives Jñāna gives supreme sukha. But Ahas which causes samsāra cycle, results in ajñāna (avidyā).

9. Sūrya causes jyotis and Ahas comes into existence. When the Jyotis ceases to exist, Rātrī comes Ahas is white. Rātrī is Kṛṣṇa. It is bhūtarātrī.

10. Stomas constitute the Ahas. Their dissection constitute Rātri pertaining to Yajña. This Rātri is auspicious.

रात्रिः पुरस्ताद् तदहश्च पश्चादहःपरस्तात् स्वयमेव रात्रिः ।
विकारतोऽहः प्रकृतिस्तु रात्रिः सैषा गतिः सा प्रभवः प्रतिष्ठा ॥ ११ ॥

९-दैववादः ।

स्नेहोऽस्ति तेजोऽस्ति तयोः प्रभेदतः सर्वं द्विधा स्नेहवशात्तु युज्यते ।
तेजोवशात्तच्च मिथो वियुज्यते ताभ्यां च सृष्टिप्रतिसृष्टयो जगत् ॥ १ ॥
स्नेहोऽस्ति सोमस्य गुणोऽथ तेजोऽस्त्यग्नेरिमौ शाश्वतिकौ हि देवौ ।
ताभ्यामिदं सर्वमुदेत्यतोऽग्नीषोमीयमेतज्जगदित्यवेयात् ॥ २ ॥
अग्निस्त्रिधा सोम इह द्विधेति स्युः पञ्च देवा बहुधा विभिन्नाः ।
सूर्योऽग्निपिण्डोऽस्ति च सोमपिण्डश्चन्द्रोऽखिलं जायत एतदाभ्याम् ॥ ३ ॥
यदस्ति किञ्चित् सकलं हि दैवाधीनं सदाकस्मिकमेव मन्ये ।
भवन्ति जीवन्ति तथा म्रियन्ते दैवादिति प्राग् बृहदुक्थ ऊचे ॥ ४ ॥
"विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वा अद्या ममार स ह्यः समान" ॥ (ऋ.वे. १०/५५/५)
संपद्यते रूपमसुष्ठु सुष्ठु वा जीवन्ति दुःखेन सुखेन वा क्वचित् ।
दीर्घायुरल्पायुरमुष्य वा भवेत् सर्वं भवत्यत्र हि दैवयोगतः ॥ ५ ॥
दैवं सर्वं बहवो हि देवाः सूर्यांशुचन्द्रांशुमयाः समेताः ।
त एव सर्वे सह वायवः स्युस्ता एव चापश्च मृदोऽग्नयश्च ॥ ६ ॥

In the Stomas, Devas are the bhaktas (organs) of each Rātri. The Bhūtas came into being from the Rātri.

11. Rātrī and Ahas go on following each other. It is day that is a modification. But Rātrī is the base which is Prakṛti. Rātrī forms the end, it is the origin and it is the support.

IX. Daivavāda

1. All things here fall under two types viz. Sneha sticky type and Agni type. These two unite in various proportions because of the stickiness property of Sneha type. They get separated by the disruptive tendency of the Agni type. Sṛṣṭi and Pralaya takes places on account of these two phenomena.

2. Soma belongs to sticky type category. Agni belongs to tejas (heat) type. These two which exist all the time, take part in the creation process and hence the saying 'अग्नीषोमात्मकं जगत्'.

3. Agni is triad of Devas and Soma is a pair of Devas and thus we have five Devas who have different functions. Sūrya is Agni pinda. Candra is Soma pinda. These two produce everything.

4. Whatever is here is all exhibition of divine powers which have by chance operated and produced all these. Brhaduktha said that everything is to be attributed to divine powers. They come into existence they live and they die and all these are controlled by divine powers.

Ojha quotes the ṛk which says, it is God's will that people die and come into existence again.

5. It is because of God's will people have impressive or unimpressive personality. It is God's will again that people are agrieved or live happily, have short span of life or long span of life.

6. Devas who are of the form of sun's rays and moon's rays constitute all the forces of Nature. Sun, moon, wind, water, earth and Agni are all Devas.

विलक्षणाः सन्ति तु दैवशक्तयस्तासां मिथोयोगवशादनेकधा ।
ये ये विकाराः प्रभवन्ति यत्र वा तदेव पश्यन्ति जगद्विजृम्भितम् ॥ ७ ॥

१०-संशयवादः ।

कुतः कदा कुत्र कथं कियन्मितं कीदृग्विधं विश्वमिदं बभूव ह ।
क्वासीदिहागात् कुत एतदीदृशं रूपं यदेतत् परितोऽनुलक्ष्यते ॥ १ ॥
प्रश्ना इमेऽनेकविधा पुरायुगाद् दैवात् सहस्रावधिवर्षपूगतः ।
आरभ्य नाद्यापि निवृत्तिमागता जिज्ञास्यतेऽद्यापि तथैव सर्वतः ॥ २ ॥
प्रश्नेषु तेषु प्रचुरं पुरायुगे विचिन्तयन्तः कतिचिन्मनीषिणः ।
विभिन्नकालान्तरिताः पुरातना व्याचक्षताऽनेकविधा विचारणाः ॥ ३ ॥
"न तं विदाथ य इमा जजान अन्यद् युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति" ॥ (ऋ.१०/८२/७)
सदाहुरेके, त्वसदाहुरेके, रजो विदुर्व्योम विदुस्तथान्यत् ।
अम्भस्तथैवावरणं च मृत्युं प्रोचेऽमृतं केचिदहश्च रात्रिम् ॥ ४ ॥
दैवं च केचिज्जगतः प्रसृष्टौ मूलं विदुः किन्तु मतानि तेषाम् ।
परस्परव्याहतभाषितानि नाद्यापि सन्तोषकराणि सन्ति ॥ ५ ॥
नाऽद्यापि निश्चित्य वदन्ति केचित् तदित्थमेवेति जगत्स्वरूपम् ।
संभावनामात्रकृतं तदेषामुक्तं ततः संशयितं समस्तम् ॥ ६ ॥
अथापि वा सन्त्वखिलानि सत्यान्येतानि तत्रापि पुनर्वदामः ।
नवं नवं यज्जगतोऽस्य रूपं कुतस्तदायाति पुनः क्व याति ॥ ७ ॥

7. The Jagat comes into existence because of various kinds of divine powers which interact and produce the various things which we see in this Jagat.

X. Samśayavāda

1-2. How did this Viśva come into existence? When did it happen? What is its form? These questions are always being asked from very early times. But we have not so far got the correct answer. It is unlikely that everything about this Viśva will ever be known.

3. Such questions were prevalent in the previous yuga and many views have been expressed by various people.

Ojha quotes a ṛk in this connection which says, 'the origin of the Jagat will always remain a mystery'.

4. Some people say Sat is the root cause of this Jagat others say it is Rajas, Some say it is Vyoma. Some say it is waters. Some others Āvarana, some others Amṛta Mṛtyu and others Ahorātra.

5. Some people say it is Daiva. But none of these is convincing.

6. Nobody is certain about what he says. Everything they say is a possibility and therefore is full of doubts.

7-8. Even assuming that what all they say is Satya, the fact is that Jagat goes on changing and the reasons for this nobody is able to understand and therefore they are subject to rejection.

अद्यापि संदिग्धमिदं न केनाप्यस्मिन् यथावद्विहितो विचारः ।
न शक्यते ज्ञातुमिदं यथावद्वस्तुस्वरूपं तदुपेक्ष्यते तत् ॥ ८ ॥
"आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः श्रृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्" ॥ (भ.गी.२.२९)

११-सिद्धान्तवादः ।

इत्थं दशेहोपनिषत्प्रभेदा ये दर्शितास्ते तु युगे द्वितीये ।
प्राग् ब्रह्मणो जन्मत एव साध्यैरध्यूहिता देवयुगेऽपि सिद्धाः ॥ १ ॥
एतानि सर्वाणि मतानि लोके चिरात्प्रवृत्तान्युपबृंहितानि ।
नैतानि सत्यादपयन्ति किन्तु सृष्टिक्रमेऽर्वाग् विषयाणि तानि ॥ २ ॥
या त्वादिसृष्टिः पृथगस्ति ताभ्यस्तां चोपदेष्टुं विमतानि तानि ।
अपोह्य तत्त्वं भगवानुवाच प्राग् विश्वकर्मा परमेष्ठिसंज्ञः ॥ ३ ॥
दश प्रधानानि मतानि तेषामवान्तरेऽनेकमतप्रभेदाः ।
भवन्ति सर्वाणि यथावदेतान्यालोच्य निर्धारितमर्थमाह ॥ ४ ॥

विश्वकर्मोवाच-

"किं स्विद्वनं क उ स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद् यदध्यतिष्ठद्भुवनानि धारयन् ॥
ब्रह्म वनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा विब्रवीमि वः ब्रह्माध्यतिष्ठद् भुवनानि धारयन् ॥" (तैत्तिरीय ब्रा.२/८/९)


Avyaya. He is always one only and is eternal.

180. When Māyābala appears on Avyaya who is Rasapradhāna and tries to drag him into the creation process, Akṣara Puruṣa is formed on him as an off shoot. This Akṣara Puruṣa who is creation oriented is all knowing and all powerful Ātmā. Ojha then quotes a passage from Mundakopaniṣad which says,

181. "Just like thousands of sparks get out from a glowing cinder in the same way Akṣara gives rise to many forms which ultimately merge with it". (Muṇd.up-2.1.1).

182. Akṣara Puruṣa and Para Puruṣa are described in Śruti as Divya Amūrta (bodiless), Puruṣas, having no birth (Aja) and pervading everywhere. They are devoid of mind, pure and have no prāna. In other words they are not connected with Manas Prāna and Vāk of material nature containing bhūta mātras. This has reference to Upaniṣadic statement.

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रः ह्यक्षरात् परतः परः ॥ (Muṇd.Up-2.1.2).

183. In the earthly beings Manas, Prana and Vāk exist. Because Akṣara Puruṣa is prāna pradhāna, Prāna takes the first place in him and then Vāk and then Manas exist. Akṣara has a very subtle form and has jyotis svarūpa. All the lokas together with their residents have support in him.

184. This Akṣara is called Bhūtabhṛt, Satya, Vijñāna, Ananta, Acyuta, Kutastha, Avyakta, Dhruva, Parāvara, Setu, Alakṣya and Iśvara.

Ojha explains all these terms.

185. Parama Mahān Aksara is Bhūtabhṛt because he supports all the bhūtas who are mortal just like Ākāśa supports the moving wind.

186-187. Akṣara has three forms viz Satya Vijñāna and Ananta. With these he pervades the

कल्पान्तकालेऽखिलभूतसंघस्तदक्षरस्य प्रकृतिं प्रयाति ।
विष्टभ्य च स्वां प्रकृतिं स कल्पोदये पुनस्तानि सृजत्ययत्नः ॥१८७॥

वशात् प्रकृत्या अवशास्तु भूतग्रामा भवन्तीह लयं प्रयान्ति ।
न तानि कर्माणि यदक्षरं तं बध्नन्ति कूटस्थमतो वदन्ति ॥१८८॥

कूटो हि मायामयबन्धयन्त्रं मिथ्याकृता वाप्यथ क्लृप्तराशिः ।
कूटोऽग्रभागः शिखरं च तस्मिन् स्थाता स कूटस्थ इति प्रसिद्धः ॥१८९॥

य एकरूपोऽखिलकालवृत्तिः कूटस्थमेतं च वदन्ति सन्तः ।
अव्यक्त उक्तः स हि यः परस्ताद् घनीभवन् व्यक्तिदशामुपैति ॥१९०॥

ये तु क्षरा यानि रजांसि तानि प्रसह्य सर्वाण्यपि संसरन्ति ।
अन्तस्थितः संसरताममीषां स निश्चलो न व्यथते ध्रुवस्तत् ॥१९१॥

क्षरं हि विश्वं तदिहावरं ततः परं तु विश्वातिगतं यदुत्तमम् ।
यदक्षरं तद्धि परावरं स वै सेतुः परं पारमुपैति तद्गतः ॥१९२॥

ईक्षामहेऽक्षैर्वयमत्र तैस्तैः प्रज्ञानुषक्तैर्न तया विमुक्तैः ।
प्रज्ञा तु विज्ञानभृतैव बोद्ध्री तेनेह लक्ष्यं न तदस्ति लक्ष्यम् ॥१९३॥

Jagat. All the created bhūtas receive Rasa from Akṣara but he remains unaffected in his form by this activity. Gīta says,

"सर्वभूतानि कौन्तेय प्रकृति यान्तिं मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पान्ते विसृजाम्यहम् ॥"

The same Ojha puts in his words.

188. All the prāṇās depend on Prakṛti Śakti. It produces them and ultimately absorbs them all. This Karmātmaka Śakti cannot bind him who remains in a cage. That is why he is called Kūtastha.

189. Kūta is a Māyā produced cage. Kūta can also mean an illusory bondage. Kūta means a heap. He remains at the top of this bhūta heap and controls them.

The top of a hill is called Kūta. Because Para Akṣara is at the top of everything, he is called Kūtastha.

190. Because he is stable and has one form, he is called Kutastha (कूटस्थः-अविचलः).

Because he is originally in the unmanifest state and later becomes manifest in the form of Kṣara he is called Avyakta.

191. When the Kṣaras and the lokas go on changing and moving out of this Jagat Akṣara remains stable and that is why he is called Dhruva.

192. This Viśva is called Kṣara. Para is Uttama Avyaya Puruṣa. In between we have Akṣara who acts as a bridge (Setu) for us who are Kṣara predominant to reach the Avyaya Puruṣa who is Rasa predominant.

193. When we see a thing we identify it with our eyes and Prajñāna Manas. Then buddhī plays its part to analyse it and keep whatever is required and reject whatever is not required. Indriya

न चास्ति भूतं तदिहाक्षरेण यद् भूतं न भूत्वा भवति स्वतन्त्रवत् ।
स व्याप्नुवन्नेत्यखिलेष्वलं रसं प्रदाय चेष्टे तदतः स ईश्वरः ॥१९४॥

अथाक्षरस्यास्य रसे यदा बलं संसृज्य सर्गाय समर्थते पुनः ।
ततः क्षरः संभवतीह पूरुषस्त्रयस्त्विमे स्यु पुरुषाः पृथग्विधाः ॥१९५॥

सर्वं तदेतत् परमक्षरं क्षरं क्षरं तु कार्य्यं यदिदं प्रदृश्यते ।
यत्कारणं तन्मतमक्षरं तथा परं न कार्य्यं न च कारणं तथा ॥१९६॥

य उत्तमः सोऽस्त्यशरीरपूरुषोऽक्षरादयः सन्ति शरीरयोगिनः ।
प्रियाप्रिये न स्पृशतोऽशरीरिणं शरीरिणोऽथापहतिर्न चैतयोः ॥१९७॥

ग्रामं हि भौतं क्षरसंज्ञमाहुः कूटस्थमत्राक्षरमाहुरन्यम् ।
अन्यं तटस्थं परमाहुरेतान्यध्यूढरूपाणि भवन्ति नित्यम् ॥१९८॥

क्षराणि सर्वाणि तदक्षरे स्युस्तदक्षरं चापि परे निगूढम् ।
तस्मात्त्रिधा भिन्नमपीदमेकं ब्रह्मैव सर्वं जगदेतदाहुः ॥१९९॥

क्षराक्षराभ्यां कृतमस्ति यावद्रूपं हि तावज्जगदेतदाहुः ।
यदन्यदस्माज्जगतः पृथक् स्यात्परं तमाहुः पुरुषोत्तमं च ॥२००॥

manas and buddhi cannot be seen for us. Therefore the question of seeing Akṣara Puruṣa who is inside manas and buddhi does not arise.

194. Akṣara is called Iśvara because he controls all the bhūtas and puts then in their proper place and activity. Because he pervades them and gives Rasa to them he is called Iśvara. He pervades everything by prāna and gives Rasa to all the Kṣaras. Rasa flows from Avyaya to Akṣara and then to Kṣara whose livelihood is looked after by Akṣara.

Ojha then explains how the Kṣara Puruṣa comes into existence.

195. Akṣara Puruṣa is the product of Avyaya Puruṣa. When in the Rasa part of Akṣara Puruṣa piling up of other balas takes place, then Kṣara Puruṣa is produced. All these three Puruṣas are of different types.

196. All these three Puruṣas constitute everything. Kṣara represents Karya (Viśva). Akṣara is the Kārana (cause). Avyaya is only a silent witness to the process though he is the basic support of everything. He is neither Kārya nor Kārana. He is like the stage in a theatre on which all the activities of actors go on.

197. Uttama (Avyaya Puruṣa) does not have a śarīra. Akṣara and Kṣara put on śarīra. Avyaya Puruṣa who is devoid of śarīra does not experience sukha or duhkha. On the other hand Akṣara and Kṣara do experience sukha and duhkha.

198. Kṣara constitutes the world of bhūtas. Akṣara is Kūtastha who rules over them, Avyaya is the tatastha Puruṣa who always remains without any change. All these three always go together.

199. All Kṣaras reside in Akṣara. Akṣara is hidden in Avyaya Puruṣa. Though these are three different entities, they are considered as constituting single Brahman. This entire Jagat is the manifestation of Brahman only.

स व्यक्तभूते वसति प्रभूते शरीरभूते पुरुषः परस्तत् ।
पुर्य्येव वासादयमक्षरोऽपि क्षरोऽपि तस्मात्पुरुषः प्रदिष्टः ॥२०१॥

परः स आख्यायत आदिपूरुषोऽक्षरस्तु योऽस्त्येष पुराणपूरुषः ।
क्षरो य आत्मा स हि यज्ञपूरुषः स एक एषः त्रिविधः पृथग्विधः ॥२०२॥

द्विधैव लोके पुरुषः प्रदिष्टः क्षरोऽक्षरो वा स इदं नु सर्वम् ।
ताभ्यां परो यः पुरुषोत्तमोऽसौ न पूरुषः स्यादिति केचिदाहुः ॥२०३॥

परस्य पूर्वं पुरुषस्य धर्म्मद्वयं यदाहामृतमृत्युरूपम् ।
परात्परं तन्न तयोः पृथक्त्वे निर्धर्मकत्वात् पुरुषत्वमिष्टम् ॥२०४॥

क्वचित्प्रकृत्योपहितं नु कर्म्मातीतामृतं यत्पुरुषं वदन्ति ।
तदेतदारोपकृतं यदऽत्रामृतेऽभिदा नोपहिते विशिष्टे ॥२०५॥

विना प्रकृत्या पुरुषो न हि स्यात् तया विशिष्टस्य तु पूरुषस्य ।
यद्यत्प्रकृत्या क्रियतेऽत्र भोग्यं तदर्थजातं पुरुषार्थमाहुः ॥२०६॥

१२. गद्यमयं पुरुष प्रपञ्चाधिकरणम् ।

द्विविधा सृष्टिः प्रतिपत्तव्या, सामान्यसृष्टिः पूर्वार्ध्या, विशेषसृष्टिः परार्ध्या चेति । सामान्यसृष्टिव्यतिरेकेण विशेष-

200. This Jagat is made up Kṣara and Akṣara. The third Puruṣa who is separate from Jagat is Puruṣottama. Here Avyaya Puruṣa has been given Viśvatīta status.

201. Para Puruṣa is the chief Puruṣa. Akṣara constitutes his Pura (habitat). Because he resides in it he is called Puruṣa. Kṣara constitutes Akṣara's Pura because the latter resides in it and therefore he is Puruṣa. Kṣara produces his own Pura (Viśva) and resides in it and therefore he is also a Puruṣa.

202. Para Puruṣa is called Adi Puruṣa. Akṣara is called Purāna Puruṣa and Kṣara who is Ātmā is called Yajña Puruṣa. One Puruṣa has become three Puruṣas.

203. Some people say that Puruṣas are only two viz Akṣara and Kṣara and they are everything here. The entity which is above both called Puruṣottama in Gītā is really not a Puruṣa.

204. But actually where dharmitva is present, there Puruṣatva also is present. Avyaya Puruṣa consists of both Rasa and bala and therefore he becomes Dharmī and therefore to say Avyaya also is Puruṣa seems to be in order. That is why Gītā has named him Puruṣottama. However Parātpara a state of Brahman prior to the formation of Avyaya and in which Rasa bala distinction does not exist is not a Puruṣa though at one place Śruti says, "परात्परं पुरुषमुपैति दिव्यम्।". To get over this contradiction Ojha has said elsewhere Para is used here to distinguish between Īśvarāvyaya and Jīvāvyaya.

205. Sometimes the term Puruṣa is applied when Prakṛti is imposed on Rasa which is beyond Karma. Here bala is Prakṛti and that is imposed on Amṛta. It is proper to call bala viśiṣta Rasa as Puruṣa. To call balopahita Rasa as Puruṣa is artificial and is strictly not correct.

206. Without Prakṛti Puruṣa does not appear. Whatever Prakṛti does becomes the bhogya of Puruṣa and that is what is called Puruṣārtha.

सृष्टिर्नोपपद्यते, तस्मात् तामेव सर्वभूतसाधारणीमादौ व्याख्याय पश्चात् प्रातिस्विकीः काश्चित् प्रदर्शयिष्यामः ॥

बृंहणबलो रसो ब्रह्म। बृंहमाणं तत् त्रिधा संपद्यते-चित् चेतना चित्यं च। यत्रैताः सर्वा बलानां बलैश्चितयो भवन्ति, तदावपनं चिद् ब्रह्म। यत एताश्चितयो भवन्ति, तदिदं चितिप्रयोजकं चेतना ब्रह्म। अन्यदन्यस्याङ्गं भवद् यदुपचीयते, तच्चित्यं ब्रह्म। रसप्रधाना चित्। समबलरसा चेतना। बलप्रधानं चित्यम्। चिद् ब्रह्म अव्ययम्। चेतना ब्रह्म अक्षरम्। चित्यं ब्रह्म क्षरमित्याहुः। समन्वितं चेदं त्रितयमेकं रूपम्। तथा च क्षरब्रह्माक्षरब्रह्माविनाभूतेऽव्ययब्रह्मणि पुरुष शब्दः। तादृशः सप्तभिः पुरुषैः कृतरूपे तावदेकस्मिन् पुरुषे प्रजापतिशब्दः। तस्यैतस्य चत्वारः पुरुषा आत्मा। द्वौ पक्षौ। पुच्छमेकं प्रतिष्ठा। तेऽमी सप्तापि प्राणाः। अथैषां सप्तानां पुरुषाणां या श्रीः, यो रसः स एतस्य शिरो मनोमयम्।

अयमत्राभिसन्धिः—योयं प्राक् त्रिधातुः पुरुष आख्यातः, स खल्वसंख्यातैरनियतैरल्पाधिकैः पञ्चजातीयैः क्षरप्राणैः पञ्चभिश्चाक्षरप्राणैः पञ्चधातुना चैकेनाव्ययेन कृतमेव सर्वदा रूपं धत्ते। तत्र बीजचितिः, देवचितिः, भूतचितिः, प्रजा वित्तमिति पञ्च क्षराः। अविद्या, काम, कर्म्म, वीर्य्य, शुक्रैर्बीजचितिः। अग्निवाय्वादित्यचन्द्रसोमैर्देवचितिः। आकाश-वायुतेजोऽम्बुपृथ्वीभिर्भूतचितिः। संतानः प्रजा। परिग्रहो वित्तम्। अथ ब्रह्मा, विष्णुः, इन्द्रः, अग्निः, सोमः—इति पञ्चाक्षराः। प्रतिष्ठा ब्रह्मा। यज्ञो विष्णुः। इन्धनमिन्द्रः। तेजनं स्थूलस्य तीक्ष्णीकरणमवयवस्फोटोऽग्निः। स्नेहोऽवयवसंकोचो घनीभावः सोमः। अथानन्दो, विज्ञानम्, मनः प्राणो वागिति पञ्च धातुरव्ययः। पञ्चाप्यते विभागा आमोदप्रमोदानाम्, ज्ञानविज्ञा-नानाम्, चेतनाशक्तेः, सर्वविधप्राणानाम्, वाचां चाऽवरोधाय पञ्च कोशा भवन्ति। विभज्यैते सर्वेऽस्मिन्नव्यये प्रतितिष्ठन्ति। इत्थं च पञ्च क्षराः, पञ्चाक्षराः, पञ्चाव्ययधातवः—इत्येताः पञ्चदश कलाः स्युः। परात्परस्तासां षोडशीकला। स इत्थं

---

12. Puruṣaprapancādhikaraṇam (in prose)

Ojha begins a lucid exposition of the evolution of Puruṣa in prose style.

Creation is of two types. One is Sāmānya sṛṣti which constitutes the first half (Purvārdhya) and Viśeṣa sṛṣti which constitutes the second half. Without completion of Sāmānya sṛṣti, Viśeṣa sṛṣti does not take place.

Ojha therefore takes up Sāmānya sṛṣti first. He is going to deal with some Viśeṣa sṛṣtis later.

Brahman is Rasa capable of blossoming into Viśva with the help of balas which are created in itself. This bṛmhaṇa (blossoming) takes place in three ways, viz Cit, Cetana and Citya. Where balas pile upon balas, the seat of action is Cidbrahman. That which causes these pilings is Cetanābrahman. Where the pilings become the part of another piling, it is called Cityabrahman. Cit is Rasa predominant. Cetanā has both Rasa and bala in equal measure. Citya is bala predominant. Cidbrahman is Avyaya. Cetana brahman is Akṣara and Cityabrahman is Kṣara. All these three remain together to give one form. Avyayabrahman which is never seen without Akṣara and Kṣarabrahmans is called Puruṣa. Seven such Puruṣas take one form called Prajāpati. Four of these Puruṣas make the Ātmā of Prajāpati. Two form his wings. One forms tail which gives him Pratisthā. All these seven are prānas. The Śrī part of all these Puruṣas constitutes his śiras which is manomaya (cf. श.ब्र. 1.6.1.1. See also our book, What is Veda? pp 23-24).

Earlier we talked of a Puruṣa who has three dhātus (Avyaya, Akṣara and Kṣara). He always takes one form with many Kṣara prāṇas of five kinds (prāṇa, āpah, vāk, anna, and annāda), which may be few or many of each kind, five kinds of Akṣara prānas and one Avyaya with five dhātus. There are five Kṣaras in him viz bīja citi, consisting of Avidya, Kama, Karma, Vīrya and Śukra, Devaciti consisting of Agni, Vāyu, Āditya, Candra and Soma, Bhutaciti consisting of Akāśa, Vāyu, Agni, Ambu (Waters) and Pṛthvī, Praja consisting of offsprings and Vitta (wealth) of different forms.

षोडशकलः पुरुषः (षोडशी)। षोडशकलं वा इदं सर्वम् (कौ० ब्रा० १६।४) इत्याहुः। तेष्विदमव्ययं न कारणं न कार्य्यम्। अथाक्षरं निमित्तकारणम्, क्षरं तु समवायिकारणं परिणतं कार्य्यजातं चेति विभागः ॥

क्षरविकाराः सर्वेऽप्यमी अक्षरादेव जायन्ते। ते चाक्षरप्राणा ब्रह्मविष्णिवन्द्राग्निसोमाख्याभिः प्रतीताः पञ्चजातीया एव भवन्ति। तेषु चायं मध्यमः प्राणः इन्द्रः प्रतिपत्तव्यः। "एकैको वै जनतायामिन्द्रः" (तै० ब्रा० १।४।६) इति श्रुति-सिद्धान्तात्। स हि सर्वानन्यांस्तान् प्राणानिन्द्रियेणेन्धे। त इद्धाः सप्त नानापुरुषानसृजन्त। तैरेव सप्तभिः पुरुषैः स पूर्वनिरुक्तो-ऽतिष्ठावा पुरुषो गर्भीभवति। एष खलु पुराणः पुरुषः सप्तस्वेतेषु यज्ञपुरुषेष्ववारपारीणोऽभिव्याप्नोति।

तत्र यदूर्ध्वं नाभेस्तौ द्वौ, यदवाङ्नाभेस्तौ द्वौ, त इमे चत्वारः पुरुषा आत्मा। यस्य वा शरीरभागस्य सत्त्वे शरीरिणः सत्त्वं न च्यवते सोऽङ्गी पुरुषोऽङ्गपुरुषाणामात्मा। येषां तु विनाशेऽपि वस्तुनः सत्त्वं नापोद्यते, तान्यङ्गनि पक्षपुच्छानीति विद्यात्। अथतस्मादात्मनः पनरन्या द्वा परुषा पक्षा। तावाकञ्चनप्रसारणाभ्या विकमहत् भवतः॥ अथ पच्छमकः प्रतिष्ठाप्राणः॥ यतः खलु शरीरमिदं पृथिव्यनुगृहीतं तदायत्तं दृश्यते स प्रतिष्ठाप्राणः तदित्थं सप्तभिः पुरुषैः कृतरूपो योऽयमेकः पुरुषः, स चित्योऽग्निः॥ स प्रजापतिः। तस्मिन्नेते चीयमानाः सप्त पुरुषाश्चित्यं शरीरं नाम॥ अथ यैतेषां सप्तानां पुरुषाणां श्रीर्यो रस आसीत्, तमूर्ध्वं समुदौहन्। सोऽयमत्र चितेनिधेयोऽग्निः। तदस्य शिरोऽभवत्। तस्मिन्नेतस्मिन् सर्वे देवाः श्रिताः। अत्र हि सर्वेभ्यो देवेभ्यो जुह्वति।

इत्थं च प्रथमः पुराणपुरुष आधारः। स हि सप्तानामेषामावपनरूपत्वादेकीभावायोपयुज्यते। तं वयोनाधपुरुषं वक्ष्यामः। तत्रैते सप्त पुरुषा वयांसि। सप्ताप्येते चित्योऽग्निरेकः शरीरम्॥ अथैतस्मिन्नाधीयमानाः सप्त श्रियो निधेयाग्निः पुरुषः। स आहवनीयः। तथा चेत्थं वयोनाधपुरुष (१) वयः पुरुषा (२) हवनीय पुरुषैरेतै (३) रतिष्ठावाग्नि (१) चित्याग्नि (२) निधेयाग्नि (३) भिर्वा कृतरूपे पुरुषे प्रजापतिशब्दो निरूढो द्रष्टव्यः॥

Brahmā, Viṣṇu, Indra, Agni and Soma are the five Akṣarās. Brahmā provides Pratiṣtha (stability). Viṣṇu is Yajña. Indra is indhana (that which activates) Agni is Tejana (that which sharpens the organs). Soma is contracting tendency that makes the organs dense and strong.

Ānanda, Vijñāna, Manas, Prāna and Vāk arethe five dhatus (components) of Avyaya. There are five Kośas containing these. Āmoda Pramoda (Samṛddhānanda) is the inner most kośa. Then we have the kośa for Jñana and Vijñāna, then a kośa for Cetanāśakti (manas) then a kośa for all kinds of prānas. The outermost kośa is Vāk (matter) kośa. These reside in Avyaya Puruṣa as separate entities. Thus five kalās of Avyaya, five kalās of Akṣara, five kalās of Kṣara and one Parātpūra form the sixteen kalās of Prajāpati. He is therefore called Sodaśī Puruṣa.

The Kausītakī Brāhmana says, "षोडशकलं वा इदं सर्वम्". In this Puruṣa Avyaya is neither Kārya nor Kāraṇa. Akṣara is Nimitta Kāraṇa, Kṣara is Samavāyi Kāraṇa. What results is Kārya which is Viśva.

All changes in Kṣara are initiated by Akṣara only. The Akṣara prāṇas are only of five kinds viz Brahmā, Viṣṇu, Indra, Agni and Soma. Of these the central prāṇa is Indra. The Taittirīya Brāhmana says that Indra plays a role in every group of prāṇas. He goads all other prāṇas through indriyas. These activated prāṇas created seven puruṣas. With these seven Puruṣas he pervades and rules all others and this purāṇa puruṣa presides over all the other seven Puruṣas who are Yajña Puruṣas and pervades everywhere.

The four Puruṣas who form his Ātmā are the two prāṇas above his navel and the two below his navel. The chief Puruṣa is present as long as his śarīra is present and therefore he is called Angī and is the Ātmā of all Angapuruṣas. The śarīra does not get destroyed even if the wing and tail prāṇas are absent. In this way two Puruṣas representing wings are the angas of Ātmān. They have power

तमेतं प्रजापतिं सर्वासु भूतसृष्टिषु बीजं विजानीयात्॥ नैतमव्ययं क्षराक्षरसंपन्नं प्रजापतिं विना कदाचिदपि क्वचिदपि काचिदपि भूतसृष्टिः कथमपि संभाव्यते ॥१॥ उक्तं च "एष वै प्रजापतिर्य एष यज्ञस्तायते। यस्मादिमाः प्रजाः प्रजाताः। एतम्वेवाप्येतर्ह्यनुप्रजायन्ते" (शत० ४।२।३।१६) इति॥ (शत० ४।४।८।१) एष ह वै प्रजापतिः सर्वं करोति॥ (शत० १३।२।६।१)॥ इत्यादि।

स एष प्रजापतिः परात्पर एव तावत् स्याद्, यावदमुष्मिन् त्रयी विद्या ब्रह्म नाविर्भवेत्। विद्याब्रह्मव्यतिरेके तस्य दिग्देशकालानवच्छिन्नेन परात्परेणानन्यत्वात् पार्थक्येनोपपत्तिर्नास्ति। स्वभावतश्चायं सर्वतः पूर्वं ब्रह्मैवात्मनि संसृजति– त्रयीं विद्याम्॥

सैवास्मै प्रतिष्ठा भवति। तस्मादेवाहुर्विद्वांसो महर्षयः–"ब्रह्मास्य सर्वस्य प्रथमजम्। ब्रह्मास्य सर्वस्य प्रतिष्ठेति॥" (शत० ६।१।१।८,१०)

ब्रह्मणा त्रय्या विद्ययाक्तः स प्रजापतिरेकैको यज्ञो भवति। "प्रजापतिर्वा एष वितायते यद् यज्ञः॥" (तै० ब्रा १।४।६) इति तित्तिरिश्रुतेः॥ "एष वै प्रजापतिर्य एष यज्ञस्तायते" (शत० ४।४।८।१)॥ इति वाजसनेयश्रुतेश्च।

बहुष्वपि सत्सु यज्ञेषु शरीरे तावदिह दश यज्ञा विशिष्य प्रवर्तन्ते। द्वौ चयनयज्ञौ, द्वौ हवनयज्ञौ, द्वौ विराड्यज्ञौ, द्वौ वषट्कारयज्ञौ, द्वौ अन्नपरिग्रहयज्ञौ चेति। येन कर्मणा धातवः शारीरा इहात्मनि प्रचीयन्ते, स एकश्चितियज्ञः। येन कर्म्मणा अग्निवाय्वादयो देवा वाक्प्राणादिरूपैरिहात्मनि प्रचीयन्ते सोऽन्यश्चितियज्ञः।

---

which enable them to contract and expand. The tail prāna is pratiṣthā (stability) Prāna. It is this tail prāna that provides the support to the Ātmā on the earth. This single Puruṣa who is made up of all the seven Puruṣa is Cityāgni and is Prajāpati. The seven Puruṣas whom he has collected represent his śarīra. The Rasa or Śrī of these seven Puruṣas was directed upwards. That became Agni which is citenidheya. It is his head. It is there all the Devas are concentrated. It is here he deposits food.

In this way the first Purāna Puruṣa forms the basic support. He is the single support to all the seven Puruṣas. He is called Vayonadha Puruṣa. These seven Puruṣas are called Vayas. All these together, form Cityāgni and that constitutes śarīra. The essence of the seven yajña Puruṣas which adorns the śarīra as its head remains at the top. It is sriyonidheyāgni. It is here all the Devas live. It is here the deposition of food (havana) takes place and therefore it is called Āhavanīyāgni.

In this way Puruṣa Prajāpati consists of Vayonadha Puruṣa, Vayah Puruṣa and Āhavanīya Puruṣa. We may also say that his form is made up of Atiṣthāvāgni, Cityagni and Nidheyāgni.

This Prajāpati is the root cause (bīja) of all bhūta sṛṣtis. Without this Avyaya Puruṣa who is always accompanied by Akṣara and Kṣara Puruṣas no bhūta sṛṣti is possible. This Prajāpati is hailed in Brahmaṇa as Yajña itself because he is responsible for the coming into existence of all Prajas. All future Prajas also will have their origin in him. He is capable of achieving everything.

This Prajāpati will have to remain as Prajāpati only unless Trayīvidyā (Veda Brāhman) joins him. It is Vidyā brahman alone that makes him creation oriented and distinguishes him from Parātpara. It is natural therefore he first creates Trayividyā on himself. This forms his Pratiṣthā (action base). That is why the sages say, "ब्रह्मास्य सर्वस्य प्रचमजम्। ब्रह्मास्य सर्वस्य प्रतिष्ठा।" (Here Brahman means Trayividyābrahman.

With Trayīvidyā operating on him, he constitutes every kind of Yajña. That is why the Brāhmana says, प्रजापतिर्वा एष वितायते (spreads) यद् यज्ञः".

Though there are many Yajñas, as far as our śarīra is concerned ten different yajñas take place.

सूर्यरसः प्राणः। पृथ्वीरसोऽपानः। प्राणोऽपाने अपानः प्राणेऽनवरतमन्योन्यस्मिन् पर्य्यायेण हूयेते। स एको होमः। तेनायं वैश्वानरोऽग्निरुदेति। अथ व्याने दैवः प्राण आहूयते। तेन प्रश्वासोच्छ्वासौ भवतः॥ श्रूयते च शतपथश्रुतौ —"अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति। स वै दैवः प्राणो यः संचरंश्चासंचरंश्च न व्यथतेऽथो न रिष्यतीति"। (१४।४।३।२९) सोऽयं द्वितीयो होमः।

सोमं तावदेतम् अग्नावेव योनौ रेतोभूतं सिञ्चति। अग्निर्वै योनिर्यज्ञस्य। स ततः प्रजायते। तद्दश वा आहुतीः संपादयेद्, याभ्यो वषट् क्रियते। अयं वै यज्ञो योऽयं पवते। सोऽयम् एक इवैव पवते, सोऽयं पुरुषेऽन्तःप्रविष्टो दशधा विहितः स एव क्लृप्तैः प्राणैरग्नेर्योनेरधिजायते। सैषा दशाक्षरा विराट् सैषा संपत्। स यज्ञः। (शत० ११।१।२।२-३) इति, "अयं वै प्राणो योऽयं पवते...योऽयं पुरुषेऽन्तःप्रविष्टो दशधा विहितः। (शत० ५।२।४।१०)॥ सवित्रा प्रसवित्रा, (१) सरस्वत्या वाचा (२) त्वष्ट्रा रूपैः (३) पूष्णा पशुभिः (४) इन्द्रेणास्मे (५) बृहस्पतिना ब्रह्मणा, (६) वरुणेनौजसा, अग्निना तेजसा (९) सोमेन राज्ञा, विष्णुनैव दशम्या देवतया (१०) प्रसूतः प्रसर्पामि। (यजुः सं०) (शत० ५।४।४।२)॥ अथैतस्मिन्नात्मन्यपरे दश धर्मा अविनाभावेन युज्यन्ते, तेनाप्ययं विराड् यज्ञः। स यथा "छन्दोभिः सवनैः पृष्ठैर्ऋतुभिर्देवतागणैः॥ ऋग्भिश्च सामभिः प्राणैर्लोकैः स्तोमै र्विराड् भवेत् ॥६॥

अथ वेदः सत्यं वाक्। सा वाग् वितायमाना वषट्कारः। स एकविंशः स्तोमस्त्रयस्त्रिंशस्तोमो वा यज्ञः॥ तथा च श्रूयते—तद् यत् तत्सत्यं त्रयी सा विद्या। यज्ञं वै कृत्वा तद्देवाः सत्यं तन्वते॥ (९।५।१।१८) अथापरो वषट्कारो येनायं जैवः प्राणोऽहरहः सूर्य्यमुपैति अहरहश्चास्मिन्नात्मनि सौरः प्राणोऽन्वावर्तते॥ श्रूयते च "अहरहर्वा एष यज्ञस्तायते। अहरहः संतिष्ठते। अहरहरेनं स्वर्गस्य लोकस्य गत्यै युङ्क्ते। अहरहरनेन स्वर्गं लोकं गच्छति"। (९।४।४।१५) इति।

अथ यदयं पुरुषोऽन्नं बुभुक्षते, अथाऽन्नं भुङ्क्ते सोऽयमत्रैकोऽन्नाहुतियज्ञः। अथ यदयमहर्निशं स्वत एव सप्तविधान्नानि भुञ्जानो जीवनं धत्ते। प्रतिक्षणं किञ्चिदवश्यं जानाति, कर्म कुरुते, शब्दं श्रृणोति, वायुना युज्यते, तेजसा युज्यते, जलं पिबति, अन्नं भुङ्क्ते, सोऽयमस्मिन्नपरोऽन्नाहुतियज्ञः॥ तदित्थमयं पुरुषो यज्ञः। सप्त पुरुषाः आश्रयाः। सप्त पुरुषाः श्रियः।

They are two Cayana yajñas, two Haviryajñas, two Virādyajñas, two Vaśatkārayajñas and two Annādāna yajñas.

One citi is that by which the śarīra dhatus get collected and piled. Another citiyajña is that by which the Devas Agni, Vāyu etc. are collected and arranged in order.

Prāna represents Sūryarasa. Apāna is Pṛthivi rasa. Prāna is offered to Apāna and Apāna is offered to Prāna in this yajña. This is one Homa. The result of this Yajña is the appearance of Vaiśvānarāngi. In another Homa Devaprana is offered to Vyāna. Breathing in and breathing out takes place. The Śatapatha Brāhmaṇa says that Deva prāna enters the Adhyatmā from waters and candra. This Devaprāna never decays whether it is moving or static. This is the second Homa.

Soma is deposited as retas in Agni which is yoni of Yajña. Then that grows into life. Or ten āhutis are made as a result of which Vaṣatkāra takes place. The spreading of Vāngmaṇdala is called Vaṣatkāra.

The Śatapatha Brāhman says that the Yajña enters the Puruṣa with specific prāṇas. As a result Agni as well Yajña are maintained. This is the Daśākṣaravirādyajña. It is the Sampat of Prajāpati who is Yajña. The ten components into which the entering Prana splits are named by the Yajurveda. They are 1. Savitā 2. Prasavitā 3. Sarasvatīvāk 4. Tvṣtā who produces rūpa 5. Pūṣan who gives (Paśu - material wealth) 6. Indra who develops ego 7. Bṛhaspati who develops Brahma bhāva 8. Varuṇa who develops Śakti 9. Soma who develops ruling capacity and 10. Viṣnu the Yajña Devatā (See our book Vedic Concept of Ātman).

ते चतुर्दश। यस्त्वत्र पुराणः पुरुषः स पञ्चदशः। अथ यस्तत्र वेदैः क्रियमाणो यज्ञ पुरुषः स षोडशः। तदित्थं षोडशकलः प्रजापतिः। षोडशकलं वा इदं सर्वम् (कौ० ब्रा० १६।४) इत्याहुः॥

स एष यज्ञ एवात्मा। तथा च श्रूयते—"सर्वेषां वा एष भूतानां सर्वेषां देवानामात्मा यद् यज्ञः।" इति। "अधियज्ञोहमेवात्र" —इति गीतावाक्यस्याप्यत्रैव तात्पर्य्यम्। आत्मेत्युच्यमानोऽर्थस्त्रय्यां विद्यायां प्रतिष्ठाब्रह्मणि प्रतिष्ठितस्तत्परिच्छेदात् पृथक्त्वेन प्रतिपन्नो वेदैः प्रतायमानो यज्ञस्वरूपः स एकः प्रजापतिर्वेदितव्यः।

सोऽयमात्मा क्षराक्षरप्रणतारतम्यान्नानाविधो भवति॥ अणोरणीयांश्व महतो महीयांश्च। तदुक्तम्—

"अणोरणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम्॥ तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः।" "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति। आत्मन्युपसंक्रान्तस्य मृत्युप्रपञ्चस्यात्मनोन्मुग्धभेदस्यानात्मत्वनिर्धारणादात्मनो विशुद्धत्वप्रतिपत्तिः अयं मृत्योरत्ययः। एतदात्माणुत्वमहत्वनिबन्धनमात्रातारतम्येन समुच्चीयमानानां न्यूनाधिकाब्भागानां क्षराणामेवेहात्मन्यालम्बितत्वादेतानि सत्त्वजातानि तत्र तत्राणीयांसि च भवन्ति, महीयांसि च। तथा चायमात्मैवान्तर्निहितस्तस्य तस्य भूतजातस्य शरीरादिस्वरूपजनयित्रीणामपां माता भवति॥ आत्ममितिपरिमितशरीरत्वात् सर्वेषामेषां भूतजन्तूनाम्॥

Another group of ten dharmas become part of this Virād yajña. They are Chandas, Savana, Pṛṣṭha Stoma, Rk, Sāma, Prāna, Loka, Ṛtu and Devatāgaṇa. (cf. प्राणाश्च देवा ऋषयो ग्रहश्च स्तोमाश्च पृष्ठान्यृतवो दिशश्च छन्दांसि सामानि दशाक्षरैषा विनाट्प्रतिष्ठां लभतेऽधियज्ञम् ॥)

All these terms have been explained in our book, Vedic Concept of Ātman).

Veda is Satya Vāk. This Vāk which spreads in all directions, and a Vāngmaṇdala is created. This is called वाग्वितानम्. This is Vaṣatkāra. This Yajña consists of twenty one or thirty three Stomas. Ojha quotes Śatapatha Brāhmaṇa which says, "This Trayividyā is Satya. The Devas promote Satya through Yajña Karma."

In another Vaṣatkārayajña Jīva prāṇa goes to the Sun everyday and Saurapräṇa in turn reaches the Jīva Prāṇa everyday. This is a Yajña in which Saura prāṇa helps the Jīva Prāna to travel to Svarga everyday. This is what the Brāhmaṇa, which is quoted by Ojha says.

Another Yajña pertains to the intake of food by this Puruṣa (Jīva) whenever he is hungry. He takes seven types of food all the time. He acquires knowledge every instant, he does some work all the time, he hears something, he inhales wind. He takes on Agni (hot things). He drinks water. He eats food. This is called Annāhuti Yajña.

Thus this Puruṣa is Yajña. Seven Puruṣas (Prāṇas) support him. Another seven Puruṣas form his Śri (Rasa which is located in the head). Purāṇa Puruṣa (Indra) is the fifteenth. Yajña Puruṣa supported by Vedas is the sixteenth. Thus this Prajāpati has sixteen Kalas. The Kauṣītakī Brāhmaṇa says "Everything here has sixteen kalas". That is everything constitutes Prajāpati.

It is this Yajña that constitutes Ātmā. The Brahmaṇa say the Ātmā of all Devas and all Manuṣyas constitute Yajña. In fact we can say that there is only one Satya in the Jagat which is Yajña. We will see more about this later. Gītacāryā also says "अधियज्ञोऽहमेवात्र".

When we say Ātmā we mean the Yajña Prajāpati who is established with the support of Trayīvidyā and who is promoted by Trayīvidyā in the form of Yajña.

This Ātmā because of different proportions of Kṣara and Akṣarapranas manifests himself in the form of various things in this Viśva. He takes forms smaller than the atom and greater than the

अथेहात्मनि चत्वारः प्राजापत्याः प्रतिभूतपिण्डं प्रजापतिसंबन्धादुपजायन्ते॥ अग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्य इति (शत० ११।१।६)। अतोऽप्याहुः—"चतुष्टयं वा इदं सर्वमिति ता वा एताः प्रजापतेरधिदेवता असृज्यन्त" (शत० ११।१।६)। ते चैते यद्यप्यन्यतोऽन्यतः संसृज्यन्ते, तथाप्येषां तत्तत् प्रजापतेर्भक्तित्वमुपसंपद्यमानानां प्रातिस्विकतया प्राजापत्यत्वमास्थीयते वाजसनेयश्रुतौ (शत० ११।१।६)॥ तत्रायं परमेष्ठी प्राजापत्य एता आपोऽऽभवन्। आपो वा इदं सर्वमभवन्। ता आपः परमेष्ठी प्रजापतिं पितरमयाजयत्। स (स्वयम्भूः) प्रजापतिः प्राणोऽभवत् "प्राणो वा इदं सर्वम्"। अयं वै प्राणो योयं पवते, स एवैष प्रजापतिः, प्रतिपत्तव्यः। यद्दै किञ्च प्राणि स प्रजापतिरिति श्रूयते। स पुनरिन्द्रमयाजयत्। स इन्द्रो वागभवत्। वाग् वा इदं सर्वम्। तस्मादाहुः "इन्द्रो वागिति"॥ तस्मादाहुः कौषीतकश्रुतौ "नेन्द्राद् ऋते पवते धाम किञ्चन" इति। "वाग् वा इन्द्रः। न ह्युते वाचः पवते धाम किञ्चन" (कौ० ब्रा० २।७) इति॥

स इन्दोऽग्नीषोमावयाजयत्। तयोरन्नाद एवान्यतरोऽभवद्, अन्नमन्यतरः। अन्नादोऽग्निः। अन्नं सोमः। अन्नादश्च वा इदं सर्वमन्नं च॥ ता वा एताः पञ्च देवताः कामप्रेण दर्शपौर्णमासयज्ञेनायजन्त। दर्शपौर्णमासयज्ञेनैव चैते चत्वारः प्राजापत्याः प्रजापरिश्चायमन्योन्यसंहिताः प्राणिशरीरे क्रमादापः प्राणः वाग् अन्नादः अन्नमिति पञ्चभिः भावैः परिणम्यमानाः प्रतितिष्ठिन्तीति विद्यात्॥

तेष्वेतेषु चतुर्षु प्राजापत्येषु सर्वतः पूर्वमिहापामात्मनि संसर्गो भवति। तत्रायं मातरिश्वा हेतुः। एष हि पारमेष्ठ्य समुद्रादुत्पद्यमानो भृगुप्राणविशेषो मतिरिश्वा नाम वायुः सर्वामिमां त्रिलोकीमभिव्याप्नोति। आपो हि तस्य मातरिश्वनो योनिः। आतश्च नैता अपो व्यतिरिच्यायं मातरिश्वा रूपं धत्ते। सोऽपां मातरि तत्रात्मनि श्वयतीति कृत्वैवाऽयमस्मिन्

---

greatest we can think of. Ojha quotes Upaniṣad passage to support this. Here अतिमृत्यमेति means getting rid of martyatva. Initially Ātmā was in the dormant state. It was pure Rasa. Now he exists with Prapanca which is ephemeral and therefore mṛtyu. The very recognition of this difference makes our Ātmā purified. This is Atyaya of Mṛtyu.

Ātmā manifests itself in various things with varying proportions and enters Kṣaras of different magnitudes. This is the reason why we see around us very small and very big things. It is Ātmā which decides the extent to which waters enter into the bhuta śarirās of various beings for building their forms and sizes and generates them himself, just like a mother generates a child.

In every bhūtapinda because of Prajāpati's sambandha, four Prajāpatis are created viz. Agni, Indra, soma amd Parameṣthi Prajāpatis. The Brāhmana says, "Everything is fourfold. These are Prajāpati's Adhidevatas". Though each Prajāpati creates another, they all become bhaktis (organs) of Prajāpati and yet they have the status of Prajāpati according to the Vājasaneya Brāhmana quoted above. Parameṣthī Prajāpati became these waters. Actually everything was waters only in the beginning. These waters goaded Prajāpati who was Svayambhū and was in the form of Prāṇa. The Kauṣītakī Brāhmaṇa says, "Everything was prāṇa only". The wind that blows is Prāṇa only and is to be recognised as Prajāpati. All Prānīs are Prajāpatis only. He made Indra perform Yajña. He became Vāk. Everything is Vāk only. Indra is therefore Vāk only. That is why Kauṣītakī Brāhmana says "There is no place where Indra does not have sway. Indra is Vāk only and there is no place which is not pervaded by Vāk."

Here Indra as a Prāṇa is related to Vāyu. It is Indra who is described in the Vedas as one who does Vyākaraṇa of Vāk. It is Indra who gave form and meaning to Vāk (speech).

Cf - "वाग वै पराच्यव्याकृताऽवदत् । तदेवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु इति । सोऽब्रवीत् वरं वृणै-मह्यं चैवैष वायवे च सह गृह्याता इति । तस्मादैन्द्रवायवः सह गृह्यते । तामिन्द्रो मध्यतोऽपक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यते इत । (तै.सं. ६.४.७).

(For more details see Ojha's पथ्यास्वस्तिः)

वायौ तत्कर्म्मनिबन्धनो मातरिश्वशब्दः प्रवर्तते। तदेतदस्य व्युत्पत्तिनिमित्तं च भवति प्रवृत्तिनिमित्तं च॥

चतुर्थं नाम लोकमेतं पारमेष्ठ्यं समुद्रमभिव्याप्नुवन्नयं मातरिश्वा वायुस्तत्र समुद्रे प्रतिष्ठितमात्मानं प्रजापतिं नाम प्राणमभितः परिगृह्णाति। सोऽयं प्रजापतिः प्राणः कनीयान् वा स्यान्महीयान् वा, तत्परिमाणेनैवायं मातरिश्वा तत्रात्मन्यपो निषिञ्चति। तथा चाह भगवान् वेदपुरुषः।

"एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे।

तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेढि स उ रेढि मातरम्" (ऋ० १०।११४।४)।

पक्षपुच्छात्मसंपन्नत्वात् प्रजापतिमेवैतं सुपर्णशब्देनाह। प्रजापतीनामानन्त्येऽप्यत्र महतो महीयांसमपेक्ष्याह—एक इति। प्रत्येकाभिप्रायेण वा व्याचष्टे—एक इति। तं माता रेढीत्यपामात्मनाऽन्योन्यसंसृष्टिमाचष्टे॥ आपो हि मातरः सर्वसृष्टीनाम्॥ आप्यस्तु वक्ष्यमाणः प्राणः पुत्रः॥ "वाग् वै माता प्राणः पुत्र"—इत्यैतरेयारण्यकश्रुतिस्तु न विरुध्यते। अपां वाग्लोकादुत्पन्नतया वाक्त्वेन व्यवहर्तुं सुशकत्वात्॥

अपि चान्यथा व्याख्यायते। मातरिश्वा वायुरेवायं सुपर्णः प्रतिपत्तव्यः। तमात्मा हि माताऽनुगृह्णाति। स चात्मानमन्वासज्जते॥

सोऽपां भूतशरीरजनयित्रीणां परिच्छेदके तस्मिन्नात्मनि श्वयमानोऽयं मातरिश्वा वायुर्यद्यन्यतो नापो लभते, तर्हि स्वसंपरिष्वक्ता एव काश्चिदपस्तत्रात्मनि संसृजति। अथ शुक्रशोणितादिभ्यो द्वारान्तरेणापां लाभे तु ता एवापोऽयमात्मन्याधत्त॥ सर्वथास्मिन्नात्मनि याना भूतप्रपञ्चोत्पत्तिबीजानामपां रतसा निषेकऽय मातरिश्वेव निषक्ता द्रष्टव्यः॥ तदुक्तम्—

"अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।


Then Indra made Agni and Soma to perform Yajña. Of them one became Annāda (eater of food). Soma became Anna. Everything here is Annāda. These five Devatas performed Yajña with Darśapūrnamāsa Yajña which is Kāmaprayajña (i.e. a Yajña through which we can get whatever we desire). It is through this Yajña these four Prajāpatis and the principal Prajāpati got united together and in the Prāṇa śarīra they reside as Prāṇa Vāk, Annāda and Anna.

Of these four Prājapatis, it is Āpah that first gets joined with Ātmā. Mātariśvā Vāyu causes this Samsarga. This Vāyu is produced in the Pārameṣthya Samudra and is a Vāyu which is nothing but Bhṛguprāna and which pervades the entire Trilokī. Āpah are the yoni of Mātariśvā Vāyu which depends only on waters to take its form. Because it grows in Parameṣthya waters in which its Ātmā grows. These waters may be considered as its Mother, and therefore, it is called Mātariśvā (अपां मातरि पारमेष्ठ्यमण्डले श्वयति वर्द्धते इति मातरिश्वा).

Waters not only produce it but also assigns to it an important Karma (Bhṛgu Prāna is an important component of creation process). Pārameṣthya loka is the fourth loka (अस्ति वै चतुर्थो लोक आपः।"-ब्रा). The Mātariśvā Vāyu which pervades it, gets itself charged with the prāna of Prajāpati who is the Ātmā established in the Parameṣthī Samudra. The prāna may be small or big in size and according to the size, Mātariśvā Vāyu sprinkles waters on the Ātmā. Ojha quotes a ṛk which says the Suparna (Prajāpati) having entered the samudra surveys the whole universe. The mother i.e. the waters takes on the Ātman affectionately (so that creations go on). I saw it without being aware of its intentions (Pākena manasā).

Here Suparna refers to Prajāpati who has already been described as having wings tail and Ātman. In one Prajāpati who is greater than the greatest all the other Prajāpatis reside and that is why the ṛk says 'One Suparṇa'. It may be that the Ṛṣi wanted to mention the Prajāpatis one by one by saying

सप्तपुरुषःप्रजापतिरात्मा



५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

५ अव्ययः
५ अक्षराः
५ क्षराः
१ परात्परः

आधार

पुरुषः

षड्विंशे द्वे शते प्राणानां प्रजापतिः

तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति॥" (यजुः सं०४०अ०)

इति॥ त्रिभिः पादैरुपदर्शितमिदमात्मनो लक्षणमात्मप्रकरणेऽन्यत्र सुविशदं निरूपितं द्रष्टव्यम्॥ इह तु केवलमात्मन्यस्मिन् योनौ सृष्ट्यौपयिकरेतोनिषेकरूपोऽयमपां संसर्गो मातरिश्वना वायुना क्रियमाणो निरुच्यते॥

तत्र योऽयमात्मा योनिः आपो रेतः, ताभ्यामात्मन्यपां ग्रन्थिः प्रजातिः, सा सृष्टिः॥ सैषा तत्रात्मनि प्रथमा सृष्टिः सृष्टीनां मैथुनीनाम्। नाद्भ्यः पूर्वं योनिजा सृष्टिरासीत्। त्रय्या विद्याया ब्रह्मणः प्रजापतिब्रह्मणि प्रतिष्ठाब्रह्मतयोपपन्नत्वात् प्रतिष्ठातः प्रागप्रतिष्ठिते प्रजापतौ सृष्टिव्यवहारायोगात्। अप्स्वेवैतास्वात्मसंसृष्टासूत्तराः सर्वाः सृष्टयो भवन्तीति सुनिभृतं विद्यात्॥ ये तु (१) नाभानेदिष्ठो (२) बालखिल्या (३) वृषाकपिः (४) एवयामरुदित्येते चत्वारः सहचराः प्राणाः क्रमेण (१) रेतसे (२) प्राणाय (३) आत्मने (४) प्रतिष्ठायै चोपयुक्ताः श्रूयन्ते ते चेतनगर्भसृष्टिविषया वैशेषिकाः प्रतिपत्तव्याः। मातरिश्वा त्वयं प्राणवायुश्चेतनाचेतनसाधारणः सर्वसृष्टिविषयः सर्वविकारोपादानभूतानामपामालम्बनकर्म्मण्यात्मनि संश्लेषणायोपयुज्यते। "आपो ह वा इदमग्रे सलिलमेवास" (शत०११।१।६)। ता आपो मातरिश्वनाऽनेनात्मनिहिताः प्रजापतिना परिच्छिद्यमानाश्छन्दसा परिगृहीताः पृथग् भूत्वा तस्यात्मनोऽङ्गत्वेनोपपद्यन्ते। अत एवैताभ्योऽद्भ्यो जायमाना सृष्टिस्तदात्मभक्तित्वेनाख्यायते। सृष्ट्युपादानभूतातानामपां तदात्मभक्तित्वेनोपपन्नत्वाद् इत्यवधेयम्। सोऽयमेतावानुपक्रमः सर्वभूतसृष्टिसाधारणः प्रतिपत्तव्यः॥

अपां संसर्गाच्चायं प्रजापतिराप्यः प्राणो भवति। प्राणस्वरूपोपपत्त्यर्थं चासामपामेवास्मिन् शरीरे भूयांसो भागा

'तं माता रेढि', the Ṛṣi wants to convey that waters engage themselves in sṛṣti by having union with Ātman. Waters are the mother of all creations. Āpya prāna is her son (पुत्र). The Aitareya Śruti "वाग वै माता प्राणःपुत्रः" is not contradicted because waters (āpah) have their origin in Vāk loka.

Now Ojha explains the ṛk in a different way. Mātariśvā Vāyu is to be understood as Suparṇa. The mother which is Ātmā blesses it. The Vāyu in turn joins her.

Having joined the Ātmā which represents the mother who is responsible for the coming into existence of bhūta śarīras, the Vāyu, Mātariśvā himself produces waters in the Ātmā after union with it whenever there are not enough waters for creation of bhūta śarīras. Through Sukra and Śonita these waters reach the Ātman. For all the creation of bhūta śarīras, it is Mātariśvā that sows the seed in the form of waters which constitute retas. Ojha quotes a mantra from Yajurveda which has been explained by him in his work उपनिषद्धृदय which has unfortunately been lost to us. But Giridhar Sharma Caturvediji, one of his principal disciples, in his commentary (in sanskrit) on Brahmasiddhānta gives the essence of Ojha's interpretation of the mantra.

The traditional method of explaining the mantra is as follows :

In Iśvara all dharmas including those which are mutually opposing are present, since he pervades everything. He runs faster than the fastest runner. In him the sūtrātmā Mātariśvā Vāyu makes available the material for creation and creation then takes place with the same material.

But Ojha explains it in a different way. According to him this Iśvara is Avyaya Puruṣa who provides the basic support to the Jagat as well as to the creative processes. He has five Kalas viz. Ānanda, Vijñāna, and Manas belonging to the mukti sākṣī group and Manas, Prāna and Vāk belonging to sṛṣti sākṣī group. His Vidyākalās are always there and do not have any change or activity. But the sṛṣti group viz. Manas, Prāna and Vāk are Karma oriented. They move fast from one place to another for performing their work. Thus Avyaya Puruṣa has both moving and stable Kalās. According to Ojha, the Karma kalās of Avyaya Puruṣa are meant here. Yajus itself represents both gati and sthiti

उपलभ्यन्ते। अद्भिरेवायमाप्यः प्राण आप्याय्यते। यावदस्य निसर्गादुत्क्रान्तमङ्गं विश्लिष्टं भवति, तावदेवास्य पुनरद्भिरुपसंचिताभिरुपसंपादितमाहितं भवति॥ तेनायमात्मा प्रदीपार्चिरिव नोच्छिद्यते। "अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वाक्।" इति हि भगवान्नुद्दालकः पश्यति (छान्दो० उप०)॥ स यदि शरीरी नापो लभते, तर्हि तस्यायमाप्यः प्राणः कनीयानिव भूत्वा विषीदति। आतश्च प्रजापतिरात्मा शरीरादुत्सीदति, सोऽद्भ्य उपपन्नोयमान्तरीक्ष्यः खल्वाप्यः प्राणः सर्वशरीरव्यापी व्यान इति नाम्ना निर्दिश्यते॥ "स एष इह प्रविष्ट आलोमभ्य आनखाग्रेभ्यः॥ यथा क्षुरः क्षुरधानेऽवहितः स्याद्, विश्वंभरो वा विश्वम्भरकुलाये। प्राणन्नेव स प्राणो नाम भवति। वदन् वाक्। पश्यंश्चक्षुः। श्रृण्वन् श्रात्रम्। मन्वाना मनः। तान्यस्यतानि कमनामान्यव। स याऽत एककमपास्त न स वद। अकत्स्ना ह्यषाऽत एककन भवति। आत्मेत्येवोपासीत अत्र ह्येते सर्वे एकी भवन्ति। तदेतत्पदनीयमस्य सर्वस्य, यदयमात्मा। अनेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देत्।"—(शत० १४।४।२।१६-१८)॥ सोऽयं मुख्यः प्राणः प्रादेशमात्रः प्रादेशमात्रो भूत्वा सर्वां शरीरयष्टिमभिसंपद्यते। तत्रैतस्यात्मन आनाभेराकण्ठाद् द्वयोः प्रादेशयो रुपांशुसवनमिति संज्ञा क्रियते॥ तस्मिन्नस्मिन्नुपांशुसवनग्रहे प्राणापानौ नामैतौ उपांश्वन्तर्य्यामग्रहौ संभवतः "प्राणापानौ वा इन्द्राग्नी"—(मैत्रा० ब्रा० १।५।६)

इति मैत्रेयी श्रुत्या ताविमौ प्राणापानौ द्यावापृथिव्यो रसौ विजानीयात्। तयोश्च प्राणापानयोः संख्यामाह भगवान् वार्कलिः॥ "श्रमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि॥ अहोरात्राभ्यां पुरुषः समेन कतिकृत्वः प्राणिति चापनिति ॥१॥ शतं शतानि (१००००) पुरुषः समेनाष्टौ शतां (८००) यन्मितं तद्वदन्ति॥ अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चापानिति" इति॥ (शत० १२।३।२।८)। तत्र अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति। (१४।३।३।२९) इति श्रूयते। तत्राद्भ्य इति चतुर्थलोकादित्यर्थः। "अस्ति वै चतुर्थो लोक आपः"—इति श्रुतेः॥

---

or Akāśa and Vāyu. Therefore the mantra stresses the fact that gati and sthiti play important roles in the creation of Jagat. The Mātariśvā Vāyu as explained above causes the deposition of retas in the Ātman which acts as the material for creation purposes.

Ojha then explains Maīthuni sṛṣṭi.

Where Ātmā acts as Yoni and waters form retas which are deposited in the Yoni, the bondage between Āpah and Ātmā constitutes Prajāpati. It is sṛṣṭi. This is the first Maīthuni sṛṣṭi in Ātman. Before the waters appeared, there was no yoni generated sṛṣṭi. There cannot be any sṛṣṭi till Trayī Vidyā gives Pratiṣtha to Prajāpati (ब्रह्मास्य सर्वस्त प्रतिष्ठा). Only in the waters created by Ātmā all the subsequent sṛṣṭis takes place. The four prānas, Nabhānediṣtha, Vālakhilyas, Vṛṣākapi and Evayāmarut are accompanying prānas for cetanagarbhasṛṣti (Sasamjña garbhasṛṣti). Nabhānediṣtha goes with retas, Vālakhilyās with chief Prāna, Vṛṣākapi goes with Ātmā and Evayāmarut goes with Pratiṣtha Prāna. On the other hand Mātariśvā which is Prāṇa Vāyu is involved both in cetana and acetana sṛṣtis and therefore plays a role in all creations and joins the Ātmā as a support for waters in the creation of objects of varying sizes and forms. The Śatapatha Brāhmana says that in the beginning the premordial waters were only a subtle form of waters called Salila. Then they joined Ātmā with the help of Mātariśvā brought under defined limitations by Prajāpati and subjected to Chandas. They then became separate and became the organs of Ātman. That is why the sṛṣtis originating from waters are called Ātmabhaktis because these waters form the Upādāna kārana for creation. In this way all ordinary bhūta sṛṣtis take place. Because Prajāpati joins waters he becomes Āpyaprāna. The prāna aspects are available only in the waters available in our śarīra.

Only by waters these āpyaprānas is nourished. Whenver any organ of it gets decayed it has to be replenished through additional supply of water. Because of this constant replenishment the Ātmā shines like the flame of a lamp. Uddalaka in Chāndogyopanisad says that manas is annamaya, prāna is āpomaya and Vāk is tejomaya (Āgnimaya). When sufficient amount of water is not available for

पृथिवीचन्द्रमसं व्यावर्तयितुमद्भ्य इत्याह। अम्भः—संज्ञानामपां व्यावृत्तये चन्द्रमसं इत्याह। तथा चोभयपदविशेषितोऽयं ब्राह्मणस्पत्यः सौम्यःप्राण इह वैश्वानराग्नौ हूयमानो द्रष्टव्यः। तत्रापि सौम्यः खलु पितृप्राणश्च भवति, दैवः प्राणश्चेति कृत्वा प्रकृते पितृप्राणत्वशङ्कानिवृत्त्यर्थं दैवः प्राण इत्याह। सोऽयं दैवः प्राणोऽपानं प्राणं च पर्य्यायेणाभ्याहन्ति, अन्योऽन्यं च पर्य्यायेणाभिभवति। प्राणोऽयं दैवो रसो हृद्यपानेनाभ्याहन्यमाने। दिवमभि प्रत्यावर्तते। प्राणमेवैतं प्रत्यावर्तितरूपं सन्तमुदानशब्देनाहुः। तावेतौ प्राणोदानौ दिव्यरसस्य मित्रावरुणौ विद्यात्। संश्रवो मित्रः अपसरणं वरुणः॥ एवमन्यस्मिन् पर्य्यायेऽनेन प्राणेनाभ्याहन्यमानोऽयमपानः पृथ्वीमभि प्रत्यावर्तते। तत्र पृथ्व्या उपेत्य शरीरे संचरन्तमेतं समानशब्देनाहुः। प्रत्यावर्तितरूपं त्वेतमपानशब्देनैवाहुः। तावेतौ पृथ्वीरसस्य मित्रावरुणौ भवतः। समानो मित्रः। अपानो वरुणः। तदित्थं प्राणोदानौ समानापानौ च व्यानेन सह संभूय पञ्च प्राणा भवन्ति। तत्र प्राणापानाभ्यामेव जीवनयात्रां मन्यन्ते लोकाः। वस्तुतस्तु—"न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" (कठो० ५ व० ५) यद्येष व्यानो न स्यान्नैतौ तर्हि प्राणापानौ शरीरे स्थानं लभेयाताम्। व्यानावलम्बितावेवैतौ प्राणापानौ जीवनं निर्वाहयतः। सोऽयं व्यानः प्रजापतिः परमेष्ठिन्यप्स्वालम्बमानः प्रतितिष्ठतीति विद्यात्।

Ātmā, the prānas get starved and become emaciated and move out from the śarīra of Prajāpati. When it is fed with waters the Āntarikṣya prāna which is āpya prāna pervades the entire śarīra and is called Vyāna. Quoting Śatapatha Brāhmana Ojha says that this prāna constitutes our Ātmā and also all our indriya prānas. Prāna is the Ātmā which we normally understand in all our worldly activities. It resides in our body just like a sword resides inside the sheath and Agni which sustains this Viśva resides in its cage (wood, etc.) and pervades our entire body and does all indriya karmas and is to be worshipped as Ātmā by us. It is the seat of all Devatas. This mukhyaprāna is Prādeśamātra (ten inches long) but its influence reaches all parts of the body. From nābhi (navel) to neck, this Ātman is called Upāmśusavana. In this Upāmśusavanagraha two grahas (organs) Upāmśu and Antaryama called prāna and Apāna are produced. The Maitrayanī Upaniṣad says these Prāna and Apāna are Indra Agni pair.

These Prāna and Apāna are to be understood as rasas of Dyan and Pṛthivi. Rṣi Vārkali says that we take in Prāna 10800 times and the same number we breath out Apāna. Both together total up to 21600. That is why Japamālā (maṇikamālā) has 109 manikas. In Āgama śāstrā śvāsa and ucchvāsa which we do is called Ajapājapa. From waters the divya prāna enters the Puruṣa (Jīva). Here waters mean Parameṣthīloka (परमेष्ठी वा आपः-ब्रा). The Śruti says "आस्ति वै चतुर्थो लोक आपः" (श.ब्रा). Actually there are two Candras (Saumya bodies). One is Parameṣthīsoma and another is the Candra who goes round the earth. Here we are concerned with Parameṣthīsoma (vide our book on Vedic concept of Soma). This Brāhmanaspatya Saumya prāna is offered to Vaiśvānarāgni. Since Pitṛprānas are also Saumyaprānas, to point out that we are here concerned with Divya prāna, the word Brāhmanaspatya has been added. This divya prāna influences both prāna and Apāna always. When the Deva prana reaches the hṛdaya, Apāna pushes it back and then prāna returns back to Devaloka. The returned prāna is called Udāna. Prāna and Udāna represent Mitra and Varuna of divya rasa. What is coming in is Mitra and what is moving out is Varuṇa. Apāna going up is also pushed back by prāṇa and when it returns to the earth it is Apāna but when it enters the Śarīra it is called Samāna. This pair constitute Mitra and Varuṇa of bhaumarasa. Samāna is Mitra and Varuṇa is Apāna. In this way there are five prānas which function in our śarīra. People think that Jīvas live only on Prāṇa and Apāna. The fact is that Jīva lives not on Prāna and Apāna but on Vyāna. Ojha quotes Kathopaniṣad in support of the above statement. If Vyāna were not there Prāna and Apāna will not get a seat in the śarīra. They have their livelihood on the support of Vyāna. This Vyāna has the support of Parameṣthi waters.

१३. निर्विकाराधिकरणम्

पुष्पस्य वस्त्रस्य च संनिकर्षे गन्धान्तरस्यानुदयोऽस्ति वस्त्रे ।
निर्गन्धता लिङ्गमथाग्नियोगाद् गन्धोदयो वस्त्रविकारतः स्यात् ॥२०७॥

रसे तु यत्रोदयते बलस्य प्रणोदनादन्यबलं प्रसुप्तम् ।
न तत्र दृश्येत रसे विकारस्ततस्तमाहुः किल निर्विकारम् ॥२०८॥

मृदस्ति तूलं पुनरस्ति सूत्रं ततोऽस्ति वस्त्रं च पुनस्तनुत्रम् ।
ततोऽस्ति कन्था पुनरग्नियोगात् क्षारं ततस्तत् पुनरस्ति सा मृत् ॥२०९॥

इत्थं यदेकं भवतीह नानारूपं तमेवात्र विकारमाहुः ।
तद्रूपकर्मादिविशेषबीजं बलं यदस्तीति रसः स एकः ॥२१०॥

अथाङ्गुलीकम्पन एव तत्र प्रकम्पनं नाम विकारमाहुः ।
कम्पो बलं तत्क्षितिरङ्गुलीयं धत्ते बलं निर्विकृतिः स्वरूपाम् ॥२११॥

ये ये विकाराः प्रथितास्तदित्थं बलस्य रूपाणि मतानि तानि ।
विलीयते यत्र बलं ततोऽन्यच्चोद्भाव्यते यत्र स निर्विकारः ॥२१२॥

क्वचिद्विमोक्षः क्वचिदस्ति बन्धः क्वचिद्विकारः क्रमते विशेषात् ।
सर्गानुसर्गप्रतिसर्गभेदात् क्वचिद्विसर्गः प्रलयः क्वचित्स्यात् ॥२१३॥

---

13. Nirvikārādhikaraṇam

In this section Ojha deals with the fact that Rasa does not undergo any changes. Ojha explains with examples.

207-209. The Vaiśeṣika Sūtras of Kanāda viz. "पुष्पवस्त्रयोःसति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम्। and पृथिव्यां व्यवस्थितः गन्धः।" say that when a flower is put near a cloth, there is no smell in the cloth other than smell of the flower. One infers from this that when the vastra is burnt in fire, a smell comes because of the change undergone by the cloth while burning. This smell is not from Agni. So Kanāda says in the second sūtra, the smell pertains to earth. That is when we trace the history of the cloth we start with earth, cotton, then thread, then the cloth is woven with the threads. When we wear it, after some time it gets worn out and becomes rag. Then it gets back to earth as part and parcel of it. These changes undergone by a substance are called Vikāra. This is caused by bala which by its Karma changes its form everytime. But we are aware that the same is there but in a different form. This 'Asti' buddhi is caused by the Rasa. Therefore we conclude that when bala is dormant and when it is made to manifest itself by the appearance of another bala in the Rasa, there is no change in the state of Rasa and this is what is called Nirvikāratā quality of Rasa.

210-212. When we shake the finger, the finger undergoes a change in its condition and the kampana (shaking) caused by bala, but by this vikāra the finger has not lost its form. Therefore one should infer that all Vikāras are caused by changes taking place in bala, when the bala weakens and disappears only to give rise to another. But the Rasa is least affected by these changes in balas and remains what it was. It is Nirvikāra.

213. There may be bandha, there may be mokṣa, there may be creations, there may be pralaya. All these take place because of changes in balas which go on appearing and disappearing on Rasa

इत्थं रसे कर्म्मवशाद्विकारो दृष्टोऽपि नास्त्येव रसे विकारः ।
अकर्म्मणो लक्षणमस्ति कर्म्म तद्विक्रियालक्षितविक्रियोऽसौ ॥२१४॥
योगो विभूतिर्यदि वास्तु बन्धो वृत्तित्वमेवास्तु तथापि मृत्युः ।
रसेऽमृते स्यादुपसृष्टमुक्तोऽमृतं तु पूर्णं विभवत्यमुष्मिन् ॥२१५॥
योषावृषाभ्यां तदिरानिराभ्यां यो बुद्बुदे फेनमृदात्मकोऽभूत् ।
परस्परासङ्गवशाद्विसर्गः संकर्मणां कर्मसु सङ्ग इष्टः ॥२१६॥
यथा पुनः श्यामलपीतसङ्गतो विलक्षणं रूपमुदेति हारितम् ।
द्वयोर्विकारेण तथामृते पुनर्न मृत्युसङ्गेन विकार ईक्ष्यते ॥२१७॥
दूर्वाग्रतः प्रातरनेकदिक्क्रमात् दृष्टोऽम्बुबिन्दू रविरश्मिसंगतः ।
रक्तः स दृश्येत हरित्तथाऽन्यथा तथाऽमृतं मृत्युवशात् पृथग्विधम् ॥२१८॥
यथा जलेऽस्मिन् विमले सितोपला बलेन रूपेण विकुर्वते स्वयम् ।
